# कविकुलगुरु–कालिदास–संस्कृत–विश्वविद्यालयः,

# रामटेकम्

## अधिनियमः 1997

## (सन 1997 महाराष्ट्र–अधिनियमः क्र.33)

सत्यमेव जयते

# महाराष्ट्र—शासन—राजपत्रम्

**असाधारणम्**

**प्राधिकृत—प्रकाशनम्**

**बुधवासरः — 28 मे, 1997/ज्येष्ठ 7, शके 1919**

**स्वतन्त्रसंकलनरूपेण ग्रथितुं अस्य भागस्य भिन्ना पृष्ठक्रमाङ्काः दीयन्ते।**

## चतुर्थः विभागः

**महाराष्ट्र—विधानमण्डलस्य अधिनियमाः, राज्यपालवर्यैः प्रख्यापिताः अध्यादेशाः विनियमाश्च महाराष्ट्र—विधानसभायां महाराष्ट्र—विधानपरिषदि च प्रस्तुतानि विधेयकानि च।**

**अनुक्रमणिका**

**1997 तमख्रिस्ताब्दस्य महाराष्ट्र—अधिनियम—क्रमाङ्कः 33—महाराष्ट्र—राज्ये संस्कृत—विद्यापीठं स्थापयितुम् अधिनियमः।** **पृष्ठानि 487—542**

**26 मे 1997 तमे दिनाङ्के राज्यपालवर्यैः सम्मतः महाराष्ट्र—विधानमण्डलस्य अधिनियमः एषः ज्ञापनार्थम् अत्र प्रकाश्यते।**

**प्रतिमा उमरजी**
**सचिवः महाराष्ट्रशासनं,**
**विधिःन्यायश्च विभागः**

———————

### 1997 तमख्रिस्ताब्दस्य महाराष्ट्रं — अधिनियम — क्रमाङ्क — 33,

(राज्यपालवर्याणां सम्मत्यनन्तरं **महाराष्ट्र—शासन—राजपत्रे** 28 मे 1997 तमे दिनाङ्के प्रथमवारं प्रकाशितः अधिनियमः)

### महाराष्ट्र—राज्ये संस्कृत—विद्यापीठस्य स्थापनार्थम् अधिनियमः

यस्मात्, संस्कृतभाषा साहित्यञ्चेति प्राचीन—भारतीय—ज्ञानागार इति वास्तवम्, यस्माच्च भारतीयभाषाणां वृद्धिः विकासश्चेति दृष्ट्या संस्कृतस्य विशेषं मूल्यं महत्त्वञ्च, देशस्य सांस्कृतिकैकात्म्ये तस्याः (भाषायाः) अनितरसाधारणः सहभागः अधुना सर्वमान्यः यस्माच्च संस्कृतसाहित्यगतानां वैश्विकमूल्यानाम् अन्वेषणं, तेषां रक्षणं तेषां प्रसारश्च ज्ञानसंपन्नसमाजस्य निर्मित्यर्थं प्राचीनभारतीयज्ञानागार—आधुनिकविज्ञानसंस्कृरित्येतयोः अधिकाधिकः समन्वयः इष्टः।

तस्माद्, उपर्युक्तेभ्यः कारणेभ्यः संस्कृत—विद्यापीठस्य स्थापनां कर्तुम् अधिनियमनिर्माणम् आवश्यकम्। अतः भारतीय—गणराज्यस्य अष्टचत्वारिंशत्तमे वर्षे, अनेन, अधिनियमः एष क्रियते —

## प्रथमम् प्रकरणं

## प्रारम्भिकम्

संक्षिप्तं नाम प्रारम्भश्च – 1 (1) एषः अधिनियमः 'कविकुलगुरु–कालिदास–संस्कृत–विश्वविद्यालयः (विद्यापीठम्) अधिनियमः 1997 इति संबोध्यः।

2) सः राज्यशासनं राजपत्रे अधिसूचनाद्वारा नियमं करिष्यति, तद्दिनाङ्कात्प्रभृति प्रवर्तिष्यते।

**व्याख्या – 2.** अस्मिन् अधिनियमे, सन्दर्भानुसारं द्वितीयोऽर्थः नापेक्ष्यते तदा –

1) विद्याविषयकं सेवा–एककम् (युनिट) नाम विद्यापीठ–विद्याविषयक–अधिकारी, महाविद्यालय–संगणक–केन्द्रम्, विद्यापीठ–मुद्रणालयः अथवा विद्यापीठस्य कस्यापि उद्दिष्टस्य प्रचालनार्थं विशिष्टसेवाप्रदायकम् अन्यत् एककम् इति;।

2) संलग्नः प्राध्यापकः, संलग्नः प्रपाठकः अथ वा संलग्नः अधिव्याख्याता नाम विद्यापीठेन सह सहयोगस्य साहचर्यस्य वा कालावधौ तथापदनिर्दिष्टः विद्यापीठ–महाविद्यालय–परिसंस्था अथवा संस्कृत–विद्या–संशोधन–केन्द्रे वा कार्यरतः अथवा उद्योगः व्यापारः, कृषिः वाणिज्यं, रक्षाक्षेत्रगतः अथवा अन्यस्मिन् कस्मिन्नपि संलग्नक्षेत्रगतः व्यक्तिः इति।

3) संलग्नमहाविद्यालयः नाम विद्यापीठद्वारा मान्यताप्राप्तसंलग्नमहाविद्यालयः।

4) प्राधिकरणानि नाम अनेन अधिनियमेन तदन्वयेन वा विनिर्दिष्टानि विद्यापीठस्य प्राधिकरणानि।

5) मण्डलानि नाम तत्तत्प्राधिकरणैः स्थापितानि विद्यापीठस्य मण्डलानि;

6) सहयोगः नाम अन्यैः विद्यापीठैः, विद्याविषयक–परिसंस्थाभिः (स्थानिकाः प्रादेशिकाः, राष्ट्रियाः अन्ताराष्ट्रियाः वा) संशोधनपरिसंस्थाभिः संघटनाभिः वा (संशोधनम् कृषिः उद्योगः व्यापारः, वाणिज्यं संरक्षणं) सह वर्तमानः विद्यापीठस्य विद्याविषयकः सहयोगी कार्यक्रमः।

7) 'महाविद्यालयः' नाम विद्यापीठद्वारा सञ्चालितः महाविद्यालयः अथवा विद्यापीठेन संलग्नः महाविद्यासलयः।

8) –सञ्चालितः महाविद्यालयः' नाम विद्यापीठद्वारा सञ्चाल्यमानः तथा च परिपाल्यः महाविद्यालयः।

9) ‘विभाग’ नाम परिनियमानुसारं—महाविद्यालये विशिष्टविषयस्य अथवा विशिष्टविषयगणस्य वा अध्यापनं यत्र क्रियते सः विभागः।

10) ‘सञ्चालक’ नाम व्यवस्थापन परिषद्द्वारा तथापदनिर्दिष्टः, विद्यापीठकेन्द्रस्य प्रशालायाः वा विद्यापीठस्य परिसंस्थायाः प्रमुखः ।

11) ‘उच्च—शिक्षण—संचालकः’, ‘सञ्चालकः वैद्यकीय—शिक्षणं संशोधनञ्च, ‘आयुर्वेद—स्ञ्चालको’ सञ्चालकः — शारीरिकशिक्षणम्, सञ्चालकः तन्त्रशिक्षणं च नाम यथाक्रमं ‘उच्चशिक्षणसञ्चालकः, महाराष्ट्रराज्यम्’ ‘सञ्चालकः, वैद्यकीय—शिक्षणं संशोधनञ्च महाराष्ट्रराज्यम्’, आयुर्वेद—सञ्चालकः, महाराष्ट्रराज्यम्’, ‘सञ्चालकः शारीरिक—शिक्षणम्, महाराष्ट्रराज्यम्, ‘सञ्चालकः, तन्त्रशिक्षणम्, महाराष्ट्रराज्यम् ।

12) ‘विद्यापीठ—विभाग—प्रमुखः’ नाम विभागस्य अध्ययनं संशोधनञ्चेत्येतयोः कार्ययोः। उत्तरदायित्वं निर्वहन् कुलगुरुणा तथापदनिर्दिष्टः अध्यापकः।

13) ‘उच्चशिक्षा’ नाम शालेयशिक्षानन्तरं स्तरीयशिक्षायाः पश्चात् ज्ञानस्य व्यासङ्गः;।

14) वसतिगृहम् इति विद्यापीठद्वारा विहितं, सञ्चाल्यमानम् अथवा विद्यापीठस्य मान्यताप्राप्तम् अथवा संलग्न—महाविद्यालयस्य वा विद्यार्थिनां कृते निवासस्थानम्।

15) परिसंस्था इति विद्यापीठेन सह युक्ता, विद्यापीठद्वारा लब्धविशेषाधिकारा, महाविद्यालयेतरा उच्चशिक्षायाः विद्याविषयिकी परिसंस्था।

16) ‘कुलाधिपतिः, ‘कुलगुरुः’ ‘समकुलगुरुः’ च इति यथाक्रमं विद्यापीठस्य कुलपतिः, कुलगुरुः, समकुलगुरुः च।

17) ‘स्थानिक—व्यवस्थापन—समितिः’ नाम एतदधिनियमद्वारा महाविद्यालयस्य कृते स्थापिता स्थायिसमितिः।

18) ‘व्यवस्थापनम्’ नाम येषां व्यवस्थापने एको वा नैके वा महाविद्यालयाः अथवा मान्यताप्राप्तः अन्याः परिसंस्था वा सञ्चान्यन्ते, विद्यापीठस्य विशेषाधिकाराः येभ्यः दीयन्ते ते ‘मुंबई—सार्वजनिक विश्वस्त व्यवस्था—अधिनियमः, 1950’ इति अन्वयेन पञ्जीकृतस्य कस्यापि विश्वस्तनिधेः (अथवा संस्था—पञ्जीयन—अधिनियम 1860—अन्वयेन पञ्जीकृतायाः कस्याः अपि संस्थायाः) केनापि नाम्ना सबद्धः विश्वस्तः अथवा व्यवस्थापनम् अथवा नियामक—मंडलम्,

परन्तु इदं यद् केन्द्रशासनेन, राज्यशासनेन, जिल्हा–परिषदा, नगरपालिका वा महानगरपालिकासदृशेन स्थानिकप्राधिकरणेन स्थापितानां सञ्चालितानां महाविद्यालयानां परिसंस्थानां वा सन्दर्भे व्यवस्थापनं नाम यथाक्रमं केंद्रशासनं, राज्यशासनं, जिल्हापरिषद् नगरपरिषद् वा महानगरपालिका वा भवति।

19) अन्यः अप्रगत वर्गः (Other Backward Class) नाम राज्यशासनेन 'अन्यः अप्रगतवर्गः (Other Backward Class) इति कृत्वा स्वीकृतः वर्गः वा तत्रत्येषु विद्यमानेषु विविधेषु गणेषु वर्तमानाः व्यक्तयः।

20) पाठशाला नाम महाराष्ट्रशासनम्, अन्य राज्यशासनानि केन्द्रशासनम् वा इत्येतेभ्यः प्राप्तमान्यता पाठशाला।

21) 'पदव्युत्तरविभागः' नाम विद्यापीठद्वारा मान्यताप्राप्तपदव्युत्तर–विभागः पदव्युत्तरशिक्षां प्रयच्छन् संशोधनार्थं मार्गदर्शनं च कुर्वन् महाविद्यालयस्य उच्चशिक्षासंशोधनस्य विशिष्टाभ्यासविषयकपरिसंस्थायाः विभागः।

22) 'विहितम्' नाम अधिनियमेनानेन यथास्थितिकृतः–परिनियमः आदेशः विनियमः नियमः वा एतैः विहितम्।

23) 'प्राचार्यः' नाम महाविद्यालयस्य, विशिष्टशिक्षापरिसंस्थायाः पदव्युत्तरकेन्द्रस्य, विद्यापीठद्वारा अधिकृततया सम्मततायाः अन्यस्याः परिसंस्थायाः वा प्रमुखः।

24) 'मान्यताप्राप्तपरिसंस्था' नाम उच्चशिक्षार्थं, संशोधनार्थं, विशेषाध्ययनार्थं वा विद्यापीठेन परिसंस्थारूपेण सम्मता महाविद्यालयेतरा परिसंस्था।

25) 'पञ्जीकृतः उपाधिधारकः' नाम एतदधिनियमद्वारा तदन्वयेन वा विद्यापीठे पञ्चीकृतः तदर्थं वा विद्यापीठेन सम्मतः विद्यापीठस्य उपाधिधारकः।

26) 'अनुसूचितजातिः' नाम भारतस्य संविधानस्य अनुच्छेद 341 अन्वयेन महाराष्ट्रराज्यसम्बन्धे–अनुसूचितजातिः इति नाम्ना संज्ञाताः जातयः, वंशाः, समूहाः वा तेषां विभागाः अंशाः वा।

27) 'अनुसूचित (जमाति)' नाम भारतस्य संविधानस्य अनुच्छेद 342 अन्वयेन महाराष्ट्रराज्यसम्बन्धे अनुसूचित इति नाम्ना संज्ञाता महाराष्ट्रराज्यस्य प्रान्तेषु निवसन्तः समूहाः

जनजातिसमूहाः वा तेषां विभागाः अंशा वा। तथा च तस्मिन्, अधिनियमस्यास्य प्रयोजने विमुक्तः (denotified) जङ्गमः च समूहः समाविष्टः।

28) 'प्रशाला' नाम विद्यापीठेन सञ्चालयमाना पाठ्यक्रमप्रशाला।

29) 'परिनियम','आदेशः''विनिमयः' चादयः नाम एतदधिनियमान्वयेन सिद्धाः विद्यापीठस्य 'परिनियमाः', 'आदेशाः', विनिमयाः च।

30) 'अध्यापकः' नाम विद्यापीठस्य कस्यापि विभागस्य वा सञ्चालितस्य संलग्नस्य वा महाविद्यालयस्य, विद्यापीठेन सम्मतायाः परिसंस्थायाः प्रशालायाः, पाठशालायाः वा पूर्णकालिकः सम्मतः प्राध्यापकः, सहयोगी प्राध्यापकः, साहाय्यकः प्राध्यापकः, प्रपाठकः, अधिव्याख्याता, ग्रन्थपालः, सञ्चालकः, शारीरिक–शिक्षकः शारीरिक–शिक्षा–निदेशकः वा।

31) 'विद्यापीठम्' नाम अनेन तृतीयबिन्दुना विधिसंस्थापितः कविकुलगुरु–कालिदास–संस्कृत–विश्वविद्यालयः (विद्यापीठम्)।

32) 'विद्यापीठ–विभागः' नाम विद्यापीठेन संस्थापितः विद्यापीठेन सञ्चालितश्च विभागः।

33) 'विद्यापीठ–अनुदान–आयोगः' नाम विद्यापीठ–अनुदान–अधिनियमः 1956 अन्वयेन संस्थापितः विद्यापीठ–अनुदान–आयोगः।

34) 'विद्यापीठ–परिसंस्था' नाम विद्यापीठेन संस्थापितं सञ्चालितकेन्द्रं वा प्रशाला वा परिसंस्था वा।

35) 'विद्यापीठ–अध्यापकः' नाम विद्यापीठेन नियुक्तः अध्यापकः।

——————————

## द्वितीयं प्रकरणम्

## विद्यापीठम्

विद्यापीठस्य विधिद्वारा संस्थापनम्

3. 1) तत्तत्समये कुलाधिपतिः, कुलगुरुः, व्यवस्थापन–परिषदः विद्वत्परिषदः सदस्यरूपेण पदं धारयन्तः व्यक्तयः तथैव तत्पश्चात् तत्तत्पुदेषु आरूढाः अधिकारिणः निर्वाचिताः नियुक्ताः वा सदस्याः इत्येते सर्वे अनेनाधिनियमेन 'कविकुलगुरु–कालिदास–संस्कृत–विश्वविद्यालयः (विद्यापीठम्) नाम्ना 'निगम–निकायेन' स्थापिताः घोषिताः च भवन्ति। अस्य निगमनिकायस्य अखण्डिता परंपरा साधारणी मुद्रा च भवतः। अनेन नाम्ना च निकायोऽयम् अभियोगी अभियोग्य च भविष्यति।

2) विद्यापीठस्यास्य मुख्यालयः रामटेकम्, नागपुरम् इत्यत्र भवेत्।

3) स्थावरजङ्गमसंपदः संपादनं धारणं च कर्तुं, भाटकेन दातुं विक्रेतुं वा हस्तांतरित कर्तुं वा सन्धिं वा कर्तुं विद्यापीठमिदं समर्थं भवेत्। मूल्याङ्कनं राज्यशासनस्य सम्मतिरिति द्वयमपि तदर्थम् अनिवार्यम्।

4. 1) अधिनियमेनानेन अस्य विद्यापीठस्य अधिकारक्षेत्रे महाराष्ट्रराज्यं समाविष्टं भवति। तथापि स्वस्य राज्यशासनस्य आवश्यकतानुसारं केन्द्रशासनस्य समयानां निर्बन्धानाम् अधीनत्वे विद्यापीठं प्रादेशिकमर्यादायाः बहिः भारते वा भारतस्य बहिः वा स्थिताय महाविद्यालयाय परिसंस्थायै वा अपि संशोधनकेन्द्राय विशेषाधिकारं प्रदातुं शक्ष्यति।

2) अधिनियमद्वारा प्रदात्तानां प्रावधानानां व्यतिरिक्तमन्येषां विद्यापीठानां विशेषाधिकाराः न नश्यन्ति।

3) संस्कृताध्ययनहितार्थं विद्यापीठं प्रादेशिकक्षेत्रस्य बहिः सम्बद्धशासनानुमत्या महाविद्यालयस्य परिसंस्थायाः संशोधनकेन्द्रस्य स्थापनां कर्तुं सञ्चालनं वा कर्तुं शक्ष्यति।

4) विद्यापीठेन संलग्ना, विद्यापीठात् प्राप्तमान्यता वा कापि शैक्षिकपरिसंस्था विद्यापीठस्य राज्यशासनस्य वा अनुमतिं विना विधिद्वारास्थापितेन अन्येन वा विद्यापीठेन सह सहयोगं न करिष्यति।

5) भारतस्य कोऽपि नागरिकः स्त्रीपुरुषजातिवंशादिभेदकारणात् विद्यापीठस्य पदात् पाठ्यक्रमात् वा वञ्चितो न भविष्यति। तथापि इदमपि यत् विद्यापीठं स्त्रीणां कृते विशिष्टं महाविद्यालयं परिसंस्थां वा

स्थापयितुम् सञ्चालयितुं वा अर्हति। शासनस्य धोरणानुगच्छत् विद्यापीठं विशिष्टवर्गाणां कृते पदानि आरक्षितानि करिष्यति।

6) संस्कृत–विश्वविद्यालयस्य उद्दिष्टानि –––

(1) संस्कृतसाहित्ये दृग्गोचराणां वैश्विकमूल्यादीनां पुनरुज्जीवनं, प्रसारश्च, प्राचीनज्ञानाधुनिकविज्ञानयोः सहसबन्धस्य प्रस्थापनम्;

अध्यापकछात्रयोः सम्बन्धस्य उदात्तीकरणं, जिज्ञासा स्वयंशासनादिमूलघटकानां अध्ययनप्रयोगपद्धतीनाम् अन्वेषणम्;

चिन्तनशील ज्ञानशाखानां विकासः

अनुशासनम् एकात्मिकदृष्टिकोणाद्यर्थं वातावरणसिद्धता,

धर्म–तत्त्वज्ञान–विविधशास्त्राणि–भाषा इत्यादीनाम् अध्ययनस्य पाठ्यक्रमाणां सौविध्यम्

विद्यापीठस्य अधिकाराः कर्तव्याश्च

**7) विद्यापीठस्य अधिकारकर्तव्यानि –**

(1) विद्यापीठेन निश्चितासु अध्ययनशाखासु पाठ्यक्रमेषु च शिक्षाध्यापनप्रशिक्षणानां प्रावधानम्।

(2) संशोधनं ज्ञानस्य वर्धनं प्रसारश्च, संस्कृतस्य अध्ययनं आन्तरज्ञानशाखीयक्षेत्राणां संवर्धनम्।

(3) सञ्चालितेषु संलग्नेषु च महाविद्यालयेषु परिसंस्थासु विशेषपाठ्यक्रमाणां प्रावधानम्।

(4)(5)(6) विद्यापीठविभाग–प्रयोगशाला–ग्रन्थालय–संग्रहालय–अध्ययनाध्यापन–संशोधनार्थं च सामग्र्यादीनाम् आयोजनं, परिरक्षणं व्यवस्थापनञ्च।

(7) विद्यापीठ–अनुदान–आयोगेन, केन्द्रशासनेन, राज्यशासनने वा स्थापितानां सर्वाणां केन्द्राणां स्थापनार्थं राज्यशासनस्य अनुमत्या प्रावधानम्।

(8) विद्यापीठ–उपक्षेत्राणां स्थापना।

(9–10–11) शिक्षकपदानि नियतकालावधिशिक्षकपदानि, शिक्षकेतरकर्मचारीपदानि च निर्माय तेषु पदेषु नियुक्तयः।

(12) सम्बद्धशिक्षकाणां संमत्या तेषां विद्यापीठे वा अन्येषु विद्यापीठेषु प्रेषणे सौकर्यम्।

(13–20) विविधपाठ्यक्रमाणां निर्माणम् विविधानां परीक्षाणां सुचारुणा सञ्चालनं, विशेषोपाधिप्रदानम् च।

(21—24) व्यवस्थापनानां महाविद्यालयानां छात्रावासानां च विश्वसनीयता—गुणवत्वयोः परीक्षणं संनियन्त्रणं च।

(25) विश्वस्तनिधिदाननिधीनां धारणं छात्रवृत्ति—पारितोषिकादीनां व्यवस्था च।

(26) शुल्कनिर्धारणम् शुल्कप्राप्तिश्च।

(27) विद्यापीठस्य संलग्नमहाविद्यालयानां मान्यताप्राप्तसंस्थानां प्रशालानां पाठशालानां वसतिगृहाणाञ्च छात्राणां व्यवहारे नियमपालने च नियन्त्रणं विनियमनमञ्च।

(28) छात्राणाम् औपचारिकानौपचारिकशिक्षयोः परस्परपरिवर्तनविषयक सौविध्यस्य प्रावधानम्।

(29) अध्यापकानां कृते पुनश्चर्यावर्गाणां सेवान्तर्गतपाठ्यक्रमाणां च प्रावधानम्।

(30—32) शिक्षकशिक्षकेतरकर्मचारिवर्गाणां कल्याणविषयकयोजनाः तेषां कर्मणः नियतकालिकमूल्यमापनं च।

(33) अध्यापकानाम् उपस्थितिविषयकाः नियमाः वैयक्तिकशिक्षावर्गाणां (Tution classes) प्रतिबन्धः च।

(34) शिक्षक—शिक्षकेतरकर्मचारिषु अनुशासनपालनबद्धता नियमानां तथैव तेषां क्रियान्वयनस्य प्रावधानम्।

(35) व्यवस्थापनानाम् आचारसंहितानिर्धारणम्।

(36) यत्रावश्यकता भवेत्तत्र अ) मुद्रणप्रकाशनविभागस्य ब) विद्यापीठविस्तारमण्डलस्य क) सूचनाकेन्द्रस्य विद्यापीठस्य उद्दिष्टपूर्तर्थ्यमुपक्रमाणां च स्थापनं क्रियान्वयनं व्यवस्थापनञ्च।

(37) संशोधनं मार्गदर्शनसेवा चेत्यर्थं अन्याभिः संस्थाभिः सह सहकार्यं व्यवस्थायाः प्रावधानं च।

(38) महाविद्यालयानां संलग्नीकरणस्य स्थगनम्।

(39) राज्यशासनस्य पूर्वानुमत्या विद्यापीठस्य सम्पदाधारितं ऋणधारणम्।

(40) संशोधनविकास, मार्गदर्शनसेवाप्रशिक्षणकार्यक्रमादिनां सेवानां मार्गेण विद्यापीठस्य संसाधनेषु वृद्धिः।

(41) संलग्नसंस्थानां पाठशालानां परिसंस्थानांञ्च व्यवस्थापनेन दण्डनीयानियमबाह्यकृतीषु विद्यापीठेन निर्धारितपरिपृच्छासमित्या

दर्शितेषु तेषां व्यवस्थापनं विद्यापीठेन अधिग्रहीतुं राज्यशासनं प्रति संसूचनम् ।

(42—43) राज्यशासनस्य पूर्वानुमत्या विदेशिविद्यापीठैः सह सहयोगीकार्यक्रमाणामायोजनं तदर्थं तेभ्यः निधिग्रहणम् ।

(44) अध्यापकानां कृते ससमयनिर्बन्धम् आचारसंहिता कार्यभारः कार्यस्य मूल्याङ्कन सेवानिर्बन्धाश्च ।

(45) शुल्कनिर्धारणेन सह विकासकार्यक्रमाणां प्रशिक्षणानां च आयोजनम् ।

(46) पाठ्यपुस्तकानां निर्मितिः प्रकाशनं च ।

(47) साहित्यसंग्रह—सन्दर्भग्रन्थ—संशोधनपरकार्याणां निर्माणम् ।

(48) विद्यापीठस्य सर्वाणि उद्दिष्टानि साधयितुं आवश्यककृतयः कर्माणि च ।

(49) राज्यशासनस्य निदेशानाम् अनुपालनम् ।

राज्यशासनस्य नियन्त्रणम्

**8) (1) राज्यशासनस्य पूर्वानुमतिं विना नार्हति एतानि कार्याणि कर्तुम् —**

1) अध्यापकानाम् अधिकारिणां कर्मकराणाञ्च पदनिर्माणम् ।

2) एतेषां वेतनसन्दर्भे निवृत्यनन्तरं प्राप्तव्यधनलाभसन्दर्भे च परिवर्तनम् ।

3) विद्यापीठ—अनुदान—आयोगात् वा राज्यशासनात्प्राप्तनिधेर्व्ययः निर्दिष्टप्रयोजनात् व्यतिरिक्त कर्तुं न शक्नोति ।

4) स्थावरसम्पत्तिविक्रयणं हस्तान्तरणं वा ।

5) विद्यापीठेन एतादृशनिर्णयः न स्वीकर्तव्यः येन (संलग्नमहाविद्यालयानां सन्दर्भे) राज्यशासनस्य वित्तीयदायित्वं वर्धेत ।

**(2) अधोनिर्दिष्टकार्याणि कर्तुं विद्यापीठं सक्षमम् —**

1) विद्यापीठेन स्वयंनिर्धारितविद्याविषयककार्यक्रमाणां शुल्कम् ।

2) विद्यापीठस्य उद्दिष्टपूर्त्यर्थ्यं संघटनाभ्यः, जनेभ्यश्च प्राप्तं धनम् ।

3) विद्यापीठेन अभ्यासविषयकम् अन्यसुविधानां कृते च निर्धारित शुल्कम् ।

**विकासनिधिश्च व्ययीकर्तृं शक्नोति —**

अ) विनिर्दिष्ट—कालावधेः विविधप्रवर्गेषु पदनिर्माणम् ।

ब) एतेषां निर्मितपदानां वेतनार्थम् ।

क) विद्याविषयककार्यक्रमाणां कृते ।

ड) विकासकार्यार्थञ्च ।

3) विद्यापीठम् अधिनियमान्तर्भूततत्त्वाधारेण संलग्नमहाविद्यालयेषु मान्यताप्राप्तपरिसंस्थासु कार्यरताना अध्यापकानाम् अन्यकर्मचारिणां च कर्तव्याः कार्यभारः वेतनं सेवानिवृत्यनन्तरं प्राप्तव्यः लाभः तेषां व्यवहारविषयकम् अनुशासनविषयकं च नियमानां प्रमाणसंहितां विनिर्माय तदाधारेण कार्यान्वयने कर्तुं शक्नुयात्। अधिनियमान्वयेन कृताः परिनियमाः आदेशाः विनियमाः नियमाश्च संहितागतनियमैःसह विसंगताः न भवेयुः।

4) अधिनियम 7 मध्ये विनिर्दिष्टानाम् अधिकाराणां कर्तव्यानां पालनं विद्यापीठद्वारा न भवति चेत् राज्यशासनं परिपृच्छां कृत्वा आदेशपालनार्थं निदेशं दद्यात्। तस्य पालनं विद्यापीठस्य कर्तव्यम्।

5) राज्यशासनं विद्यापीठस्य महाविद्यालयानां प्रशालानाम् अथवा परिसंस्थानां लेख्यानां नियतकालानन्तरं लेखापरीक्षां कर्तुं शक्नोति।

**द्वितीयं प्रकरणं समाप्तम्**

## तृतीयं प्रकरणम्

## विद्यापीठस्य अधिकारिणः

### (अ) कुलाधिपतिः (कुलपतिः)

कुलाधिपतिः तस्य अधिकाराश्च

9) 1 तत्तत्समये पदासीनः महाराष्ट्रस्य राज्यपालः विद्यापीठस्य कुलाधिपतिः तत्पदपरत्वेन विद्यापीठस्य प्रमुखश्च भविष्यति।

2 तस्य उपस्थितौ, विद्यापीठस्य दीक्षान्तसमारोहस्य आध्यक्षं निर्वक्ष्यति। आवश्यकतानुसारं प्रयोजनविशेषेण विद्यापीठस्य प्राधिकरणस्य सभार्थं निदिशं दातुं शक्नोति कुलगुरुश्च अस्याः सभायाः कार्येतिवृत्तं कुलाधिपतये प्रस्तूयेत्।

3—4 आवश्यकतानुसारं विद्यापीठस्य कार्येण सह सम्बद्धाः सूचनाः, इतिवृत्तानि वा इत्यादीनां समर्पणम् आदेष्टुं कुलाधिपतिः अधिकारी वर्तते। विद्यापीठस्य कल्याणाय योग्याः निर्देशाः स दधात्। विद्यापीठस्य प्राधिकरणैः अधिकाराभिः संस्थाभिः च ते परिपालनीयाः।

तथापि इदमपि यत्, कुलाधिपतिः तत्पूर्वं कारणदर्शनसूचनां प्रेषयेत्।

5 कस्यापि सदस्यस्य वर्तने नियमबाह्ये सति, तद्विषयके अपर्याप्ते च स्पष्टीकरणे कुलाधिपतिः तं सदस्यं उचितकालावधिः निलम्बनादेशं यच्छेत्।

6 अधिनियमेनानेन प्रदत्तान् विहितान् वा अधिकारान् कुलाधिपतिः योजयेत्।

विद्यापीठस्य अन्ये अधिकारिणः

विद्यापीठस्य अन्ये अधिकारिणः

10 विद्यापीठस्य अन्ये अधिकारिणः —

1) कुलगुरुः 2) समकुलगुरुः 3) अधिष्ठाता 4) कुलसचिवः 5) परीक्षा—नियन्त्रकः 6) सञ्चालकः—नियोजन—विकास—मण्डलम् 7) ग्रन्थपालः 8) वित्त—लेखा अधिकारी 9) सञ्चालकः—विस्तारसेवामण्डलम् 10) सञ्चालकः—छात्रकल्याणम् 11) परिनियमेन विहिताः अन्ये अधिकारिणः

कुलगुरुः समकुलगुरुः च

11 बिन्दुक्रमाङ्क 12 अन्वयेन तथानियुक्तः कुलगुरुः भविष्यति। स एव विद्यापीठस्य प्रमुखः परिषदां, विभागानां, समितीनां पदसिद्धः अध्यक्षः भवेत्। कुलाधिपतेः अनुपस्थितौ सः दीक्षान्तसमारोहे आध्यक्षं निर्वक्ष्यति।

2) बिन्दुक्रमाङ् 13 अन्वयेन समकुलगुरुः नियुक्तः भवेत्। कुलगुरूणा प्रदत्तानि कार्याणि स कुर्यात्। कुलगुरुणाम् अनुपस्थितौ सः प्राधिकरणसभानाम् आध्यक्षं निर्वक्ष्यति।

कुलगुरोः नियुक्तिः

12 1) कुलाधिपतिद्वारा कुलगुरोः नियुक्तिः।

अ) कुलगुरोः नियुक्त्यर्थं सुयोग्यं व्यक्तिं पुरस्कर्तुं स्थापितायां समितौ अधोदत्तानां समावेशः भविष्यति।

1 उच्च तन्त्रशिक्षायाः च प्रभारी सचिवः 2) विद्यापीठानुदानायोगेन नामनिर्दिष्टः व्यक्तिः 3) कुलाधिपतिना नामनिर्दिष्टः व्यक्ति 4) व्यवस्थापन—परिषदा नामनिर्दिष्टः संस्कृतविद्याव्यासङ्गी 5) विद्वत्परिषदा नामनिर्दिष्टः व्यक्ति

ब) नामनिर्दिष्टाः सदस्याः न कयापि परिसंस्थया संबद्धाः भवेयुः।

क) तेषु एकं कुलाधिपतिः 'अध्यक्ष' रूपेण चिनुयात्;

ड) गणपूर्त्यर्थं सदस्यत्रयम् आवश्यकम्;

2—4 पूर्वकुलगुरोः कालावधेः समापनस्य मासत्रयात् पूर्वं प्रक्रिया आरभेत् समित्या पुरस्कृतेषु त्रिषु व्यक्तिषु अन्यतमस्य नियुक्तिः कुलगुरुः कुर्यात्।

तथापि समित्या पुरस्कृतानि नामानि अस्वीकर्तुं कुलाधिपतिः अधिकारभाक्।

5 पञ्चवर्षात्मकः वयसः पञ्चषष्टिपर्यन्तः वा कुलगुरोः पदकालावधिः;

6 कुलगुरुपदारूढः व्यक्तिः तस्य धारणाधिकारं ग्रहीष्यति।

7 विशिष्टासु परिस्थितिषु अन्यस्य नियुक्तिं कुर्यात् कुलाधिपतिः।

8—11 कुलगुरोः वृत्तिः; अतिरिक्तःनिधिः इत्यादयः राज्यशासनेन निर्धार्यन्ते।

12 कुलगुरुः मासपूर्वं सूचनां प्रदाय त्यागपत्रं दातुं शक्नोति।

13 विशिष्टासु परिस्थितिषु कुलाधिपतिः स्वयं सम्यक् परीक्ष्य कुलगुरोः पदच्युतेः निर्णयं करिष्यति।

समकुलगुरोः नियुक्तेः

1) कुलगुरूणा सह चर्चां कृत्वा कुलाधिपतिः समकुलगुरुं कार्ये नियोक्ष्यति।

कुलगुरोः अधिकार—कर्तव्यानि

14 कुलगुरुः विद्यापीठस्य प्रमुखः विद्याविषयकः कार्यकारी च अधिकारी भवेत्। विश्वविद्यालयस्य विकासस्य उत्तरदायित्वं सः निर्वहेत्।

अधिष्ठाता

15 प्रत्येकं संकायस्य एकः अधिष्ठाता पञ्चवर्षाणि यावत् भवेत्। संकायस्य विकासस्य उत्तरदायित्वं सः निर्वहेत्। कुलगुरुः प्रत्येकं सङ्कायस्य कृते शिक्षकेषु एकं नामनिर्देशितं कुर्यात्।

नियोजनविकास मण्डलस्य सञ्चालकः

16 कुलगुरुः नियोजन—विकास—मण्डल—संचालक—रूपेण विद्यापीठस्य, परिसंस्थानां अध्यापकेषु प्राचार्येषु च कस्यापि नियुक्तिं कुर्यात्। सः सर्वेषां परिसंस्थानां विद्याविषयकलेखापरीक्षार्थे उत्तरदायित्वं निर्वहेत्। विद्यापीठं महाविद्यालयाः परिसंस्थादीनां वैज्ञानिक—औद्योगिक—वाणिज्यविषयक—संघटनाभिश्च सहयोगः इत्यादिः तस्य कार्यं भवेत्। तेन प्रदत्तं वार्षिकेतिवृत्तं कुलगुरुः विद्वत्परिषदि स्थापयेत्।

| | | |
|---|---|---|
| कुलसचिव नियुक्तिः कर्तव्यानि च | 17 | निर्वाचनसमितिद्वारा पुरस्कृतेषु नामसु अन्यतमस्य कुलसचिवरूपेण नियुक्तिः भवेत्। पञ्चवर्षाणि यावत् कालावधौ कुलसचिवः व्यवस्थापनपरिषदादिनां सचिवरूपेण कार्यं कुर्यात्। प्रशासनसुधारणाविषयकं अन्यत् समये–समये विहितं कार्यं स कुर्यात्। |
| परीक्षा–नियन्त्रकः | 18 | परीक्षानियन्त्रकस्य नियुक्त्यर्थं स्थापितया समित्या पुरस्कृतेषु अन्यतमस्य पञ्च वर्षाणां कृते नियुक्तिः भवेत्। परीक्षाविषयकं सर्वं कार्यं सः कुर्यात्। |
| ग्रन्थपालः | 19 | विद्यापीठस्य ग्रन्थपालः इति कुलगुरोः नियन्त्रणे पूर्णकालिकः वेतनधारकः अधिकारी भवेत्।<br>विद्यापीठग्रन्थालयस्य विकासः, आधुनिकीकरणम् सुरक्षा–व्यवस्थापनादयः, हस्तलिखितसंग्रहस्य संरक्षणम्, इत्यादिषु कार्येषु तस्य उत्तरदायित्वं भवेत्। संलग्नितमहाविद्यालय–पाठशालादीनां ग्रन्थपालानां सः मार्गदर्शकः भवेत्। |
| वित्तलेखा–अधिकारी | 20 | वित्तलेखा–अधिकारी कुलगुरोः आधिपत्ये वित्तलेखा, वित्तलेखापरीक्षा इति विभागस्य पूर्णकालिकः वेतनधारक अधिकारी भवेत्।<br>तस्य नियुक्तिः व्यवस्थापन–परिषदा नामनिर्देशनेन भवेत् अथवा भारत/राज्यशासनस्य अधिकारी प्रतिनियुक्तिरूपेण (deputation) नियुक्तो भवेत् वित्तलेखाधिकारी वित्त–लेखा–समितेः सदस्यसचिवो भूत्वा व्यवस्थापनपरिषदः अर्थसम्बन्धिषु कार्येषु–सभासु उपस्थितो सहभागी च भवेत् तथापि न स मतदानस्य अधिकारी।<br>कर्तव्यानि – विद्यापीठस्य निधेः परीक्षणं संरक्षणं; अर्थविषयकं कुलगुरोः मार्गदर्शनं यद्–यद् अर्थविषयकम् अर्थसम्बन्धिनं कार्यं तद् तद् अनेन संरक्षणीयम्, परीक्षणीयम्, निरीक्षणीयम् |
| छात्र–कल्याण–सञ्चालकः | 21 | कुलगुरुः अध्यापकेषु छात्र–कल्याणसञ्चालकस्य नामनिर्देशनं कुर्यात्। तस्य वित्तलाभः सेवासमयाधिकारकर्तव्यानि च आदेशद्वारा विहितानि भवेयुः। सः वर्षद्वयं यावत् कार्यं कुर्यात्। पुनर्नियुक्तिपात्रः सः भवति। |
| विस्तार सेवा–मण्डल–सञ्चालकः | 22 | विस्तार–सेवा–मण्डलसञ्चालकः कुलगुरोः नियन्त्रणे पूर्णकालिकः वेतनधारकः विद्याविषयकः अधिकारी भवेत्। चयनसमितेः पुरस्कारम् अनुसृत्य कुलगुरुः तं नियोजयेत्। चयनसमितौ अ) कुलगुरुः (अध्यक्षः) ब) व्यवस्थापनपरिषदा नामनिर्दिष्टौ संस्कृतविस्तारसेवायाः तज्ज्ञौ क) विस्तारसेवामण्डलस्य नामनिर्दिष्टः जनः इत्येतेषां समावेशः भूयात्।<br>तस्य वित्तलाभ–सेवासमयादयः आदेशान्वयेन विहिताः भविष्यन्ति। |

3) असौ विस्तारसेवामण्डलस्य सदस्य–सचिवो भूत्वा मार्गदर्शने संस्कृतस्य तत्सम्बद्धविषयाणां च विविध–विस्तार–कार्यक्रमाणां संयोजनं समन्वयनं च कुर्यात्। इतिवृत्तं च मण्डलस्य मान्यताम् अधिगन्तुं व्यवस्थापनपरिषदि समर्पयितुं च प्रस्तूयेत्।

विद्यापीठस्य अधिकारिणः प्राधिकरणानां संस्थानां सदस्याः कर्मचारिणश्च एते लोकसेवकाः

23 विद्यापीठस्य सर्वे वेतनधारकाः अधिकारिणः, प्राधिकरणानां, समितीनां, संस्थानां 1860 इत्यस्य सदस्याः, अध्यापकाः अन्ये च कर्मचारिणः भारतीयदण्डविधानसंहितायाः बिन्दुक्रमाङ्क 21 इत्यस्य अर्थान्तर्गतं लोकसेवाका इति मन्यन्ते।

**तृतीय प्रकरणं समाप्तम्**

## चतुर्थं प्रकरणम्

विद्यापीठस्य प्राधिकरणानि

24 **विद्यापीठस्य प्राधिकरणानि –**

1) व्यवस्थापनपरिषद् 2) विद्वत्परिषद् 3) संकायः 4) अध्ययनमण्डलम् 5) परीक्षामण्डलम् 6) नियोजनविकासमण्डलम् 7) विस्तारसेवामण्डलम् 8) परिनियमद्वारेण प्राधिकरणनाम्ना संबोध्यमानाः अन्याः संस्थाः

व्यवस्थापनपरिषद्

25 **व्यवस्थापनपरिषद् –** व्यवस्थापनपरिषदि निम्नलिखिताः सदस्याः स्युः। 1) कुलगुरुः (सभापतिः पदसिद्धः) 2) समकुलगुरुः (सदस्यः पदसिद्धः) 3) परिनियमेन विहितः अधिष्ठाता 4) कुलाधिपतिना अग्रक्रमेण नामनिर्दिष्टः महाराष्ट्रशासनस्य संस्कृत–स्थायि–समितेः सदस्यः 5) महाराष्ट्र– विधानसभायाः सभापतिना नामनिर्दिष्टः विधानसभासदस्यः 6) महाराष्ट्रविधानपरिषदः सभापतिना नामनिर्दिष्टः विधानपरिषद्सदस्यः 7) उच्चशिक्षासचिवः, तेन नामनिर्दिष्टः व्यक्तिः वा (पदसिद्धः) 8) उच्चशिक्षासञ्चालकः तेन नामनिर्दिष्टः व्यक्तिः वा 9) परिनियमेन विद्यापीठविभागप्रमुखः 10) परिनियमेन विहितः महाविद्यासलयस्य, परिसंस्थायाः पाठशालायाः वा प्रमुखः 11) विद्यापीठविभागेभ्यः एकः अध्यापकः 12) परिसंस्थाभ्यः प्राप्तदशवर्षानुभवः मुख्याध्यापकपदव्यतिरिक्तः च अध्यापकः 13) अध्ययनमण्डलसदस्यः 14) विद्वत्परिषद्सदस्यः 15) नियोजनविकासमण्डलसञ्चालकः

3–4) विद्यापीठस्य कुलसचिवः, वित्त–लेखा–अधिकारी, परीक्षानियन्त्रकश्चैते परिषदः पदसिद्धसचिवः सदस्यौ भवन्ति तथापि न मताधिकारिणः

5) वर्षाभ्यन्तरे चतस्रः सभा भविष्यन्ति।

व्यवस्थापनपरिषदः अधिकारकर्तव्यानि

26 **व्यवस्थापनपरिषदः अधिकारकर्तव्यानि –**

1) संस्थानां कृते आवश्यकेष्टवस्तूनां प्रावधानम्।

2) विशेषाध्ययनपरिसंस्थानां स्थापना।

3–4) विद्यापीठस्य धनसंपदां धारणं, नियन्त्रणं प्रशासनव्यवस्थापनम् च।

5) वित्तलेखासमित्या सिद्धस्य अर्थसंकल्पस्य पुनर्विचारः, मान्यताप्रदानं च।

6) विद्यापीठपक्षतः अनुबन्धनिर्माणम् (Agreement), तस्मिन् परिवर्तनं, तस्यप्रयोगः, तस्य समापनं च।

7) विद्यापीठस्य मुद्रानिश्चितिः तस्याः अभिरक्षा उपयोगः च।

8–9) विद्यापीठद्वारा विश्चस्तनिधेः मृत्युपत्रस्थदानं तथैव स्थावरजङ्गमसम्पदः हस्तान्तरणस्य स्वीकारः।

10) वित्तलेखासमत्याः विज्ञप्त्यनुसारं विद्यापीठद्वारा ऋणग्रहण ऋणदानं निधेः योग्यः विनियोगः।

11) निधेः योग्योपयोगार्थं नीतिनिर्धारणम्।

12) विद्यापीठस्य कृते भूमिः उपस्करोपकरणानां व्यवस्था।

13) उपाधिप्रदानं दीक्षान्तसमारोहः च।

14) अधिछात्रवृतिः, प्रवास्यधिछात्रवृत्तिः शिष्यवृत्तिः पारितोषिकानि एतेषां कृते विनियमानुसारं नियमनिर्धारणम्।

15) अन्याभिः परिसंस्थाभिः सह विद्याविषयककार्यक्रमाणां सहयोगः

16–20) आवश्यकपदनिर्माणः वेतननिश्चितिः इत्यादिविषयाः

21–22) शुल्कं, मानधनं, पारिश्रममिकम् इत्यादिविषयाः

विद्वत्परिषदः सदस्याः

अ) कुलगुरुः – अध्यक्षः आ) समकुलगुरुः इ) संकायानाम् अधिष्ठातारः ई) अध्ययनमण्डलानाम् अध्यक्षाः उ) विस्तारसेवामण्डलसञ्चालकः ऊ) सञ्चालित/संलग्नमहाविद्यालयेषु पाठशालासु, परिसंस्थासु प्रत्येकं क्रमशः प्राचार्यः ए) प्राध्यापकेभ्युः कुलगुरुणा नामनिर्देष्टः प्राध्यापकः ऐ) विद्याशाखाभ्यः प्रत्येकं प्रतिनिधित्वरूपेण अध्यापकः ओ) विद्यापीठस्य विद्याविषयकसेवा–एककस्य प्रमुखः औ) कुलगुरूणा नामनिर्दिष्टौ संस्कृतविद्वांसौ क) महाराष्ट्रराज्यस्य उच्चशिक्षासञ्चालकः सहसञ्चालकः वा ख) महाराष्ट्रशासनस्य मानासेवि–संस्कृत–संघटकः

4) वर्षावधौ सभाद्वयम्।

विद्वतपरिषदः अधिकारकर्तव्यानि

28 विद्वत्परिषदः अधिकारकर्तव्यानि –
विद्याविषयकं प्रमुखं प्राधिकरणं भवेत्। विद्यापीठस्य अध्यापनं, संशोधनं परीक्षा चेत्यादीनां नियमन–स्तरसंरक्षणार्थं उत्तरदायी भवेत्।

परीक्षामण्डलम्

29 परीक्षामण्डलम्–परीक्षाणाम् आयोजनं, तत्सम्बद्धान धोरणात्मकनिर्णयान् परीक्षाविषयकानि अन्यानि च सर्वाणि कार्याणि कुर्यात्।

परीक्षामण्डलस्य अधिकारकर्तव्यानि

30 परीक्षामण्डलं विद्यापीठपरीक्षाणां सुचारूसञ्चालनं, नियमनं, परिणामघोषणाः इत्यादीनाम् उत्तरदायी भवेत्।

सङ्कायः

31 संकायः नाम विद्याशाखायां समाविष्टानां विषयाणाम् अध्ययनस्य संशोधनसम्बन्धानां, बहुविधविशाखानां च अध्ययनसंशोधनसम्बन्धे विद्यापीठस्य विद्याविषयकसमन्वयसाधकानि प्राधिकरणानि विद्याशाखाः च।

सङ्कायस्य अधिकारकर्तव्यानि

32 **संकायस्य अधिकारकर्तव्यानि –**

विचारार्थं प्राप्तविषयान् विचार्य तद्विषयकम् इतिवृत्तं तत्तद्परिषदं प्रति प्रेषितव्यम् अध्ययनमण्डलैः पुरस्कृतान् विषयान् विचार्य तद्विषयिकीं मान्यतां प्रदाय विद्वत्परिषद प्रेषितव्यम्। यद्यद् विद्याविषयकं कार्यं तत्तद् करणीयम्।

अध्ययन मण्डलानि

33 प्रत्येकं विषयार्थं विषयसमूहार्थं वा अध्ययनमण्डलं भवेत्। अध्ययनमण्डले तत्तद्विषयस्य विद्यापीठविभागस्य परिसंस्थायाः वा प्रमुखः संलग्नसञ्चालितमहाविद्यालयानां तत्तदविभागप्रमुखाः इत्येतेषां समावेशः भूयात्।

अध्ययन मण्डलस्य अधिकारकर्तव्यानि

34 **अध्ययनमण्डलस्य अधिकारकर्तव्यानि –**

विचारार्थं प्राप्तविषयान् सम्यक् विचार्य तत्सम्बद्धपाठ्यक्रमाणां पुरस्कारः पाठ्यपुस्तकानां पुरस्कारः समर्थनं वा, पाठ्यक्रमपरिवर्तनविषयकं मार्गदर्शनं प्राश्निक–परीक्षक–नियामकानां नियुक्त्यर्थं नामनिर्देशनम् महाविद्यालयानां संलग्नीकरणाय तस्य कालावधेः वर्धनाय मान्यताप्रदानं च।

विस्तारसेवा–मण्डलम्

35 विद्यापीठस्य–विद्याविषयकाणां विस्तारकार्यक्रमाणां नियन्त्रणार्थं भवेत् **विस्तारसेवामण्डलम्।** मण्डले –

अ) कुलगुरु आ) कुलगुरुणा नामनिर्दिष्टाः त्रयः व्यक्तयः इ) उच्चशिक्षासंचालकः ई) केन्द्रसर्वकारेण सह विचारविनिमयेन विद्यापीठस्य कार्यक्षेत्रे विद्यमानस्य आकाशवाणीकेन्द्रस्य सञ्चालकेषु अन्यतमः उ) विस्तारसेवामंडलसञ्चालकः इत्येते सदस्याः भवयुः।

2–3) आवर्षात् द्विवारं सभा भवेत्, वार्षिककार्यक्रमाणां सिद्धता, विशिष्टकालानन्तरं तेषां पुनरीक्षणं च।

36 अधिनियमेनानेन प्रथमसभायाः दिनाङ्कतः प्राधिकरणसदस्यानां कालावधिः पञ्चवर्षात्मकः भवेत्।

सः व्यक्तिः त्यागपत्रं दातुमर्हति कुलगुरुम् उद्दिश्य पत्रेण विनापूर्वानुमत्या तृतीयवारं अनुपस्थिते तस्मिन् तस्य सदस्यत्वं स्थगितं भविष्यति।

प्राधिकरणानां सदस्यत्वस्य निरर्हता प्रति

39 विकलमनस्कः नैतिकदृष्ट्या अधःपतितः वैयक्तिकरीत्या अध्यापनं कुर्वाणः शिक्षकः परीक्षायाः कार्यान्वये अनुचितव्यवहारार्थं दण्डीहः च सदस्यत्वस्य कृते निरर्हः।

प्राधिकरणानां निर्णायकता

40 प्रत्येकं प्राधिकरणं स्वाधिकारे निर्णयक्षमः।

सदस्यानां पदत्यागः

41 कुलाधिपत्या नामनिर्देशितः कुलाधिपत्याः अनुमत्या अन्ये च सदस्याः कुलगुरोः अनुमत्या सदस्यत्वस्य त्यागं कर्तुं शक्नुयुः।

42 प्राधिकरणस्य सभा अध्यक्षानुमत्या सदस्यसचिवेन प्रदत्तां सूचनाम् अनुसृत्य भवेत्; निश्चितसमयाद् अर्धघण्टानन्तरं गणपूर्तिं विना सभा भविष्यति।

43 अपदंसिद्धसदस्यस्य पदस्य रिक्तभावे वरिष्ठतामाधृत्य अन्यं सदस्यं नामनिर्दिष्टं कर्तुं शक्नोति कुलगुरुः। तदा पूर्वतनसदस्यस्य कालावधौ एव अस्य कालावधिः भविता।

**चतुर्थं प्रकरणं समाप्तम्**

## अथ पञ्चमं प्रकरणम्
## परिनियमः आदेशः विनियमश्च

परिनियमः 44) अस्य अधिनियमस्य प्रावधानानाम् अधीनत्वेन परिनियमेषु अधोदत्तानां सर्वेषां अथवा केषाञ्चन परिनियमानां वा कस्यचित् विषयस्य कृते प्रावधानं भवेत्।

1) सन्मानोपाधिप्रदानं दीक्षान्तसमारोहस्यायोजनञ्च।
2) विद्यापीठविभागाः, परिसंस्थाः, सञ्चालितमहाविद्यालयाः, उच्चशिक्षापरिसंस्थाः, संशोधन–विशिष्टाध्ययनपरिसंस्था, वसतिगृहाणि च स्थापितव्यानि सञ्चालितव्यानि च।
3) विद्यापीठस्य अधिकारिणाम् अधिकाराः कर्तव्यानि च।
4) विद्यापीठस्य प्राधिकरणानाम् अधिकाराः कर्तव्यानि च।
5) विद्यापीठकर्मचारिणां सेवाज्येष्ठता सेवानिर्बन्धाश्च इत्येतेषां नियमनं कुर्वन्ति तत्त्वानि।
6) विद्यापीठस्य प्राधिकरणानां, मण्डलानां, समितीनां च सदस्यान् निरर्हान् कर्तुं प्रावधानानि।
7) विद्यापीठविभागान् परिसंस्थाः वा सञ्चालितमहाविद्यालयान् वा निरस्तीकरणम्।
8) राज्यशासनस्य मान्यतानुसारं विद्यापीठस्य, संलग्नमहाविद्यालयानां, प्रशालानां, पाठशालानां च (राज्यशासनं, केन्द्रशासनं स्थानिकप्राधिकरणं चेत्येतैः सञ्चालितान् महाविद्यालयान् परिसंस्थाः वा विहाय) अध्यापकाः, अधिकारिणः, अन्ये कर्मचारिणः इत्येषाम् अर्हताः सेवाप्रवेशाः, आचारसंहिताः, पदावधयः, कर्तव्यानि सेवानिर्बन्धाः, तेषां नियतकालिकं मूल्यमापनं, निवृत्तिवेतनम्, उपदानं भविष्यनिर्वाहनिधिः इत्येतेषां प्रावधानानि, तेषां सेवासमाप्तेः पद्धतयः।
9) विद्यापीठस्य उद्दिष्टानि साधयितुं विद्यापीठनिधेः उपयोगः;
10) महाविद्यालयानां संलग्नीकरणम् अथवा महाविद्यालयानां संलग्नीकरणनिरस्तीकरणम्।
11) व्यक्तिसंघटनाभ्यः प्राप्तः विश्वस्तनिधिः, मृत्युपत्रितं दानं, दानं, दाननिधिः, अनुदानानि च इत्येतेषां स्वीकरणं व्यवस्थापनं च।
12) राज्यशासनस्य धोरणमनुसृत्य अनुसूचितजातयः, अनुसूचितसमूहाः अन्यः अपग्रतवर्गश्च इत्येतेषां व्यक्तीनां कृते विद्यापीठे, संलग्नमहाविद्यालयेषु, प्राप्तमान्यतापरिसंस्थासु, प्रशालासु पाठशालासु च अध्यापकानां, अधिकारिणां कर्मचारिणां च पर्याप्तसंख्याकानि पदानि संरक्षितुं प्रावधानम्।

13) शैक्षिकवर्षस्य कार्यार्थं–दिवसाः, प्रत्यक्ष–अध्यापनस्य दिवसाः रविवासरं विहाय अन्ये अवकाशाः, दीर्घावकाशः सत्राणि च।

14) राज्यशासनं, केन्द्रसर्वकारः, स्थानिकं प्राधिकरणं चेतैः सञ्चालितान् महाविद्यालयान् परिसंस्थाश्च विहाय, विद्यापीठस्य संलग्नमहाविद्यालयानां मान्यताप्राप्तपरिसंस्थानां प्रशालानां, पाठशालानां च दोषिणः अध्यापकाः अधिकारिणः अन्ये कर्मचारिणः च एतेषां विरुद्धं अनुशासनभङ्गस्य कार्यान्वयम्

15) राज्यशासनस्य मान्यतायाः अधीनत्वेन लोकहिताय विद्यापीठद्वारा महाविद्यालयस्य परिसंस्थायाः वा व्यवस्थापनस्य अङ्गीकरणं हस्तान्तरणं वा, तद्विषयकान् समयनिर्बन्धाश्च।

16) अधिनियमस्यास्य प्रावधानानां कार्यान्वयनार्थं विधानयोग्यः आवश्यकाः वा बिन्दवः।

परिनियम –निर्माण –पद्धतिः

45) 1) इतः परं व्यवस्थापनपरिषद् प्रावधानानुसारं नियमान् कर्तुं, परिवर्तनं कर्तुं निरसनं च कर्तुं शक्नुयात्

2) आवश्यकतानुसारं व्यवस्थापनपरिषद् विचारार्थं प्रस्तुतानां परिनियमानां प्रारूप सम्बन्धे विद्यापीठस्य कस्यचिदपि अधिकारिणः प्राधिकरणस्य मण्डलस्य वा अभिप्रायम् अधिगन्तुं शक्नुयात्

तथापि, ईदृश–प्रारूप–लेखांशे विद्याविषयकबिन्दुना सह सम्बद्धे सति, व्यवस्थापनपरिषद् तद्विषये विद्वत्परिषदः अभिप्रायम् अधिगच्छेत्।

3) व्यवस्थापनपरिषदा सम्मतः प्रत्येकं परिनियमः कुलाधिपतिं प्रति प्रेषयिष्यते। कुलाधिपतिः तत्परिनियमार्थम् अनुमतिं दद्यात्, तं स्थगितं वा कुर्यात् पुनर्विचारार्थं परिषदं प्रति वा प्रेषयेत्।

4) यावत्कालपर्यन्तं कुलाधिपतिः अनुमतिं न दद्यात् तावत्कालपर्यन्तं व्यवस्थापनपरिषदा सम्मतः परिनियमः न विधिग्राह्यः भवेत् न वा कार्यान्वितः भवेत्।

5) पूर्ववर्ति–उपनियमेषु यत्किमपि अन्तर्भूतं वर्तते तथापि कुलाधिपतिः स्वयं वा राज्यशासनस्य उपदेशान्वयेन वा विनिर्दिष्टबिन्दुसम्बद्धपरिनियमे प्रावधानानि समावेष्टुं विद्यापीठं निर्देष्टुं शक्नोति। अथ च निर्देशप्राप्त्यनन्तरं षष्टिदिवसेभ्यः प्राक् व्यवस्थापनपरिषद् तस्य कार्यान्वयनं न करोति चेद् तद्विषयकानि कारणानि कुलाधिपतिं ज्ञापितव्यानि। कारणानि विचार्य योग्याः परिनियमाः कर्तुं वा तान् परिवर्तयितुं वा शक्यन्ते।

आदेशाः तेषां विषयाश्च

46) अधिनियमेनानेन तदन्वयेन विहितनिर्बन्धानामधीनत्वेन व्यवस्थापनपरिषद् अधोदत्तेषु सर्वेषु वा केषुचन बिन्दुषु प्रावधानानि कर्तुम् आदेशाः वा निर्मातुं शक्यन्ते।

1) विद्यार्थिभ्यः विविधोपाधिप्रमाणपत्रान्यविद्याविषयकविशेषोपाधीनां पाठ्यक्रमेषु प्रवेशस्य निर्बन्धाः।

2) विद्यापीठे महाविद्यालयेषु वा एतादृशेषु पाठ्यक्रमेषु उपस्थातुं पञ्जीयनार्थं विद्यार्थिभ्यः ग्राह्यं शुल्कं (शिक्षाशुल्कं वसतिगृहव्ययं समाहृत्य) — साधारणतया एकस्मिन् स्थानिकक्षेत्रे वर्तमानानां महाविद्यालयानां कृते शुल्कं समानं भवेत्। विविधोपाधिपदविकाप्रमाणपत्रान्यविद्याविषयकविशेषोपाधिनां परीक्षाणां कृते प्रवेशशुल्कं स्नातकानां कृते पञ्जीयनशुल्कं च।

3) विद्यापीठस्य विद्यार्थिनां निवासः, वर्तनमनुशासनविषयकाः समयनिर्बन्धाः। अनुशासनभङ्गस्य अधोदत्तैः बिन्दुभिः सह अनुचितवर्तनस्य च कृते प्रदेयः दण्डः—

अ) परीक्षावधौ अनुचितप्रकारः अन्यान् वा अपप्रेरणा।

ब) परीक्षाणां—प्रभारि—अधिकारी विद्यापीठस्य अन्यः अधिकारी वा प्राधिकारी वा इत्येतैः कृतायां अधिकृतपृच्छायां उपस्थानस्य साक्ष्यप्रदानस्य वा अस्वीकारः।

क) विद्यापीठे वा विद्यापीठात् बहिः अनुशासनहीनव्यवहारः आक्षेपार्हं वर्तनं वा।

4) विद्यापीठस्य विभागः, महाविद्यालयाः प्राप्तमान्यतासंस्थाः प्रशालाः पाठशालाः च इत्येतेषाम् अध्यापकानाम् अर्हताः तेषां वर्गीकरणम् च।

5) परीक्षकाणां नियुक्तयः कर्तव्यानि च इत्येतेषां नियमनार्थ समयनिर्बन्धाः।

6) परीक्षाणां घटकपरीक्षाणाञ्च आयोजनम्, परीक्षकैः करणीयस्य विद्यार्थिनां मूल्यमापनस्य परीक्षायाः वा पद्धतयः।

7) विद्यापीठस्य अध्यापकानां सम्बन्धिनी मान्यता, विद्यापीठविभागः महाविद्यालयाः मान्यताप्राप्तसंस्थाः, प्रशालाः पाठशालाश्च इत्यत्र अध्यापयितुं येषां अधीनत्वेन अर्हता मान्या भवेत् ते समयनिर्बन्धाः।

8) महाविद्यालयानां, मान्यताप्राप्तसंस्थानां, प्रशालानां, पाठशालानां, सभागृहाणां वसतिगृहाणां च परीक्षणम्।

9) सभागृहाणां वसतिगृहाणां च मान्यताः।

10) विद्यापीठार्थं विद्यापीठपक्षतः वा संविदानांम् अनुबन्धानां वा पद्धतिः।

11) महाविद्यालयाः मान्यताप्राप्तसंस्थाश्च इत्येतैः अनुसरणीयाः कार्यान्वयनीयाः स्थानान्तरणसम्बन्धिनः नियमाः।

12) एषः अधिनियमः परिनियमः वा इत्येतद्द्वारा तदन्वयेन वा यदर्थम् आदेशेन प्रावधानानि क्रियन्ते कर्तुं वा शक्यन्ते ते सर्वे विषयाः।

13) सामान्यतः एषः अधिनियमः परिनियमः वा इत्येतद्द्वारा तदन्वयेन वा व्यवस्थापनपरिषदे प्रदत्तानाम् अधिकारान् च प्रयोक्तुं प्रदत्तानां कर्तव्यानां पालनं कर्तुं च व्यवस्थापनपरिषदः मतेन आवश्यकप्रावधानसम्बन्धिनः सर्वे विषयाः।

आदेशाः तेषां निर्माणं च

47 1) अधोदत्तया पद्धत्या व्यवस्थापनपरिषद् आदेशान् कर्तुं तेषु परिवर्तनं वा कर्तुं तान् निरस्तान् वा कर्तुं शक्नुयात्।

2) पूर्वसंलग्नोपनियमस्य खण्ड (1) तः खण्ड (7) पर्यन्तं निर्दिष्टबिन्दवः विद्यापीठस्य अध्यापनस्यपरीक्षाणां च स्तरसंरक्षणसम्बद्धान् बिन्दून् इति विषयेषु कस्यचिदपि आदेशस्य लेखांशं विद्वत्परिषदा यावत् न प्रस्तूयते तावत्पर्यन्तं व्यवस्थापनपरिषद् तम् आदेशं न करिष्यति।

3) व्यवस्थापनपरिषद् उपनियम (2) अन्वयेन विद्वत्परिषदा प्रस्तावितं लेखांशं परिवर्तयितुं (शोधयितुं) न अधिकारी; तथापि सा तम् अमान्यं कर्तुं शक्न्युयात् अथवा सूचनाभिः सह भागशः पूर्णतः वा विद्वत्परिषदे पुनर्विचारार्थं प्रेषयितुं शक्नुयात्।

4) व्यवस्थापनपरिषदा कृताः आदेशाः तस्याः निदेशस्य दिनाङ्कात् कार्यान्विताः भविष्यन्ति, तथापि ईदृशः आदेशः सप्ताहद्वयाभ्यन्तरे कुलाधिपतये प्रेषणीयः भवेत्। आदेशप्राप्तेः दिनाङ्कात् सप्ताहचतुष्टयाभ्यन्तरे कुलाधिपतिः स्थगनादेशं व्यवस्थापनपरिषदे प्रेषयेत्; आक्षेपं च यथासत्वरं परिषदे कथयेत्। तत्सम्बद्धं व्यवस्थापनपरिषदः अभिप्रायं प्राप्य स्थगनादेशं कुलाधिपतिः प्रतिनिवर्तयेत् आदेशं अमान्यं वा कुर्यात्। तस्य निर्णयः अन्तिमः स्यात्।

विनियम—नियमाश्च

48 1) एतदधियमद्वारा तदन्वयेन विहितानां वा समयनिर्बन्धानां व्यवस्थापनपरिषदः मान्यतायाः च अधीनत्वेन विद्वत्परिषद् एषः अधिनियमः, परिनियमः आदेशः वा इत्येतद्वारा तदन्वयेन वा सर्वान् वा विशिष्टान् बिन्दून तत्सम्बद्धविषयान् वा अधिकृत्य प्रावधानानि कर्तुं अधिनियमेन, परिनियमेन आदेशेन सह सुसङ्गतं यथा स्यात् तथा विनियमं कर्तुं शक्नोति।

2) किमपि प्राधिकरणं कापि संस्था वा व्यवस्थापनपरिषदः पूर्वमान्यतायाः अधीनत्वेन अधोदत्तानां विषयाणां कृते अनेन अधिनियमेन परिनियमेन, आदेशेन, विनियमेन च सह सुसङ्गतं यथा स्यात् तथा नियमं कर्तुं शक्नोति।

अ) तेषां सभायाः दिनाङ्कः समयश्च करणीय कार्यं च विषयकं संसूचनम्;

ब) सभायाः कार्यपद्धतिः गणपूर्तये आवश्यकी सदस्यसंख्या इत्येतेषां नियमनं सभायाः कार्यवृत्तस्य अभिलेखनम्;

क) प्राधिकरणं मात्रं संस्थां वा इत्येतेषां सम्बद्धानां विषयाणां कृते प्रावधानानि

3) एते नियमाः व्यवस्थापनपरिषदि प्रस्तोष्यन्ते, परिषद् च नियमकारिणः प्राधिकरणस्य संस्थायाः वा प्रयोजनं विचार्य स्वमतेन उचितपद्धत्या तेषु परिवर्तनं (शोधनं) कर्तुं शक्नोति तान् निरस्तुं वा शक्नोति । इति ।

**पञ्चमं प्रकरणं समाप्तम्**

## षष्ठं प्रकरणम्

## प्रवेशः, परीक्षा, विद्यार्थिसम्बद्धा अन्ये च विषयाः

प्रवेशः

49. राज्यशासनस्य अनुसूचित जाति–अनुसूचित समूहनां तथा च अन्य–अप्रगतवर्गीयाणां कृते आरक्षणधोरणस्य अधीनत्वेन राज्यशासनने कृतान् राजपत्रे च प्रसिद्धान् विद्यापीठेनकृतान् विद्यापीठपत्रे च प्रसिद्धान् च नियमान् अनुसृत्य स्पर्धाम् आधृत्य विद्यापीठविभागस्य संलग्नमहाविद्यालयानां च पाठ्यक्रमेषु प्रवेशाः दीयन्ते।

तथापि इदमपि यत् सम्पूर्णराज्यस्य छात्राणां हिताय राज्यशासनेन कृतेषु आदर्शनियमेषु विद्यापीठं तान् नियमान् अङ्गीकरिष्यति। एते च नियमाः प्रतिवर्षं ऑगस्टमासस्य प्रथमदिनाङ्कात् पूर्वं प्राप्स्यमाने विद्यासत्रे तस्य षण्मासात्पूर्वं विद्यापीठपत्रे यथास्थितौ राजपत्रे वा प्रकाश्यन्ते।

तथापि इदमपि च यत् अनुशासनपालनार्थं सम्बद्धप्राधिकरणं विद्यार्थिभ्यः प्रवेशं निराकर्तुं अधिकारी।

परीक्षाणां वेलापत्रकम्

50. प्रत्येकं विद्यासत्रस्य प्रारम्भे, विपरीतायां परिस्थितावपि प्रत्येकं संवत्सरस्य ऑक्टोबरमासस्य 30 दिनाङ्कात् पूर्वं विद्यापीठं स्वस्य वा संलग्नमहाविद्यालयस्य परिसंस्थायाः प्रत्येकं पाठ्यक्रमस्य परीक्षायाः समयसारणीं सिद्धां प्रसिद्धां च करिष्यति तस्याः अनुपालनं च करिष्यति।

स्पष्टीकरणम् – परीक्षायाः समयसारणी इत्यस्यार्थः परीक्षायोजनानार्गतं प्रत्येकं प्रश्नपत्रिकायाः समयः दिवसः, दिनाङ्कश्च इत्येतेषां विवरणम्–प्रात्यक्षिकपरीक्षाणामपि विवरणम् अस्याम् अन्तर्भूतं स्यात्

तथापि नियन्त्रणबाह्यकारणैः परिस्थित्या च विद्यापीठं अस्याः समयसारण्यां परिपालनं कर्तुम् असमर्थं तर्हि यावच्छीघ्रं विद्यापीठं कुलाधिपतये राज्यशासनाय 'प्रसिद्धायाः समयसारण्याः अनुपालनं किमर्थं नाभवत्' इत्यस्य विस्तृतानि कारणानि इतिवृत्ते लिखित्वा तदितिवृतं प्रेषयिष्यति।

परीक्षा–फलस्य उद्घोषणम्

51. परीक्षायाः परिणामान् तस्य विशिष्टपाठ्यक्रमस्य परीक्षायाः अन्तिमदिनाङ्कात् त्रिंशत्दिनेभ्यः पूर्वम् उद्घोषयितुं विद्यापीठं प्रायतेत, अधिकाधिकं पञ्चचत्वारिंशत् दिनेभ्यः पूर्वं तु विपरीतायामपि परिस्थित्याम् उद्घोषयेत् एव।

परन्तु उपर्युक्तपञ्चचत्वारिंशत् दिनेभ्यः पूर्वं परिणामान् घोषयितुं विद्यापीठं यदि न शक्ष्यति तर्हि अस्य विलम्बस्य विस्तृतानि कारणानि लिखित्वा तदितिवृत्तं विद्यापीठं राज्यशासनाय च कुलाधिपतये च समर्पयेत् ।

वेला—पत्रकस्यनानुपालनस्य कारणात् परीक्षाः न अवैधाः

52. विद्यापीठेन यथास्थिति बिन्दुक्रमाङ्क, 71 तथा 72 अन्वयेन विनिर्दिष्टसमयसारिण्याः अनुपालनं न कृतमित्यनेन कारणेन न कापि परीक्षा परीक्षायाः परिणामः वा अवैधः न भवतिं ।

53. क्रीडा, सांस्कृतिकाः अन्ये च कार्यक्रमाः इत्येतदर्थं यथास्थिति, स्वस्ववर्गस्य महाविद्यालयस्य विद्यापीठस्य प्रतिनिधित्वं कर्तुं छात्राणां चयनं स्पर्धामाध्यमेन गुणवत्ताधारितमेव भवेत् । तदर्थं विद्यापीठेन योग्यपरिनियमाः आदेशाः नियमाश्च कार्याः ।

**षष्ठं प्रकरणं समाप्तम्**

## सप्तमं प्रकरणम्

## समितयः

54(1)(अ) विद्यापीठस्य ग्रन्थालयात् ग्रन्थालयसेवां च प्रशासितुम् आयोजयितुं परिरक्षितुं च ग्रन्थालयसमितिः भवेत् । समितौ समाविष्टाः सदस्याः यथा – ग्रन्थालय–समितिः

(1) कुलगुरुः – अध्यक्षः

(2) कुलगुरुणा नामनिर्दिष्टः विद्याशाखायाः अधिष्ठाता

(3) कुलगुरुणा नामनिर्दिष्टः विद्यापीठं, परिसंस्था विभागः वा इत्येषां प्रमुखः

(4) विद्वत्परिषदा तत्सदस्येभ्यः नामनिर्दिष्टः अध्यापकः

(5) कुलसचिवः

(6) ग्रन्थपालः – सचिवः

(ब) पदसिद्धसदस्यान् विहाय ग्रन्थालयसमितेः पदावधिः पञ्चवर्षात्मकः भवेत् ।

(क) समितेः कर्तव्यानि यथानिर्दिष्टानि –

(1) ग्रन्थालयप्रलेखनसेवां सुयोग्यरीत्या आयोजयितुं प्रचालयितुं, पुस्तकसंग्रहम् अद्ययावत् कर्तुम् च प्रावधानम् ।

(2) ग्रन्थालयप्रलेखनसेवानाम् आधुनिकीकरणं तस्मिन् परिवर्तनस्य च प्रावधानम् ।

(3) विद्यार्थीभिः अन्यैः च उपयुज्यमानानां ग्रन्थालयसेवानां शुल्कं अन्यं च शुल्काकारविषये व्यवस्थापनपरिषदं प्रति पुरस्कारः ।

(4) वित्तलेखासमिते मान्यताम् अधिग्रहीतुं ग्रन्थालयस्य वार्षिक–अर्थसंकल्पस्य ग्रन्थालयविकाससम्बन्धिनः च प्रस्तावस्य सिद्धता ।

(5) ग्रन्थालयकार्यस्य वार्षिकेतिवृत्तस्य सिद्धता ।

(6) कुलगुरोः मार्गदर्शने हस्तलिखितानि ऐतिहासिक–पत्राणि च रक्षयितुम् उपसमितेः स्थापना ।

वित्तलेखा–समितिः (2) (अ) वित्तलेखासमित्यां समाविष्टाः सदस्याः –

(1) कुलगुरुः – अध्यक्षः;

(2) समकुलगुरुः;

(3) उपसचिवस्तरीयः राज्यशासनेन नामनिर्दिष्टः व्यक्तिः ।

(4) लेखा–कोषागार–सञ्चालकः वा लेखा–कोषागारसहसञ्चालकस्तरीयः तस्य (सञ्चालकस्य) प्रतिनिधिः ।

(5) व्यवस्थापनपरिषदा तत्सदसेभ्यः नामनिर्दिष्टं व्यक्तिद्वयम् ।

(6) विद्वत्परिषदा तत्सदसेभ्यः नामनिर्दिष्टं व्यक्तिद्वयम् ।

(7) वित्त–लेखा–अधिकारी–सचिवः ।

(ब) समितेः सभायाः गणपूर्तेः संख्या 'पञ्च' इति स्यात्

(क) पदसिद्धान् सदस्यान् विहाय समितेः अन्यसदस्यानां पदावधिः पञ्चवर्षात्मकः स्यात् ।

(ड) उपलब्धानि प्रावधानानि विचार्य लेखा–व्ययस्य प्रगतिः–अन्तर्भूतनवव्ययाः नूतनप्रस्तावाः–इत्यादीनां परीक्षणार्थं वर्षावधौ समितेः चतस्रः सभाः भविष्यन्ति ।

(ई) वित्त–लेखा–अधिकारिभिः सिद्धं विद्यापीठस्य वार्षिक–लेखा–विवरणं वित्तीय–अर्थसंकल्पः च विचारार्थं, पुरस्कारार्थं च तदनन्तरं व्यवस्थापनपरिषत्पुरतः तन्मतेन योग्यां कार्यवाहीं कर्तुं वित्त–लेखा–समितेः पुरतः स्थापयिष्यते

(फ) अर्थसंकल्पः त्रिषु भिन्नभिन्नेव भागेषु सिद्धः क्रियते ।

1) परिरक्षणम् 2) विकासः 3) स्वतन्त्रः प्रकल्पः योजनाः सहयोगकार्यक्रमः

अनुदानानि वा ।

समित्या अधोदत्तकार्याणि कर्तव्यानि च करणीयानि –

(ग) 1) उत्पादककार्यार्थं लभ्यमानात् ऋणात् प्राप्तेन उत्पन्नेन सह विद्यापीठस्य उत्पन्नं साधनसंपदा धारितवर्षस्य आवर्ति–अनावर्तिव्ययस्य मर्यादायाः पुरस्कारः व्यवस्थापनपरिषदि करणीयः ।

2) विद्यापीठसम्पद् साधनसम्पद् च इत्येताभ्यां उत्पादक–लाभार्थविनिवेशः तस्य व्यवस्थापनम् इति विषये व्यवस्थापनपरिषदं प्राति पुरस्कारः।

3) विद्यापीठविकासाय साधनसम्पद्वर्धनस्य संभाव्याः शक्यताः अन्वेषणीयाः अवलम्बनीया च।

4) व्यवस्थापनपरिषदा नियुक्तैः लेखापरीक्षकैः विद्यापीठस्य लेखानां परीक्षणाय आवश्यकं कार्यवहनम्।

5) विद्यापीठस्य सम्पदः निधेश्च प्रशासनसंबद्धबिन्दुविषये व्यवस्थापनद्परिषदे उपदेशः।

6) वित्तीयविषयसम्बद्धानां समयेसमये प्रसारितानां राज्यशासनस्य आदेशानां कार्यान्वयविषये निश्चयनम्।

7) व्यवस्थापनपरिषद्, विद्वत्परिषद् वा विद्यापीठस्य प्राधिकरणं मण्डलं समितिः कश्चन अधिकारी वा इत्येताभिः निर्दिष्टानां वित्तीयविषयाणां सम्बन्धे उपदेशः।

8) समित्या वित्तीयविषयेषु निरीक्षिताः प्रमादाः अनियमितताः च कुलगुरवे निवेदनीयाः। तासां गाम्भीर्यं निधार्य कुलगुरुः सत्वरं उचितकार्यवहनं कर्तुं शक्नोति अथवा व्यवस्थापनपरिषदं प्रति प्रेषयितुं शक्नोति।

(ह) समितेः अन्याः अधिकाराः कर्तव्यानि तस्याः सभायाः कार्यपद्धतिः च यथा विहितं भवेत्।

(आय) विद्यापीठस्य, महाविद्यालयानां परिसंस्थानां वार्षिकलेखाः राज्यशासनेन नियुक्तैः लेखापरीक्षकैः परीक्षितुं उपलब्धाः भविष्यन्ति।

क्रयसमितिः (3) (अ) एकस्मिन् समये शताधिकमूल्यस्य क्रयवस्तूनां विषये विचारयितुं विद्यापीठस्य एका क्रयसमितिः स्यात्।

(ब) अस्यां समितौ अधोदत्तानां सदस्यानां समावेशः स्यात्।

1) कुलगुरु – अध्यक्षः;

2) कुलगुरुणा नामनिर्दिष्टाः विद्यापीठस्य परिसंस्थानां विभागानां वा त्रयः प्रमुखाः;

3) व्यवस्थापनपरिषदा तत्सदस्येभ्यः नामनिर्दिष्टौ द्वौ सदस्यौ;

4) कुलसचिवः;

5) वित्तलेखा—अधिकारी

(क) सामान्यतः वित्त—लेखा—अधिकारी क्रयसमितिसचिवरूपेण कार्यं करिष्यति। वित्त—लेखा—अधिकारिणः अनुपस्थितौ कुलसचिवः समितेः सचिवरूपेण कार्यं कुर्यात्।

(ड) क्रयसमितिः, येषां कृते क्रयः करणीयः तेषां विद्यापीठ—परिसंस्थानां विभागानां वा प्रमुखान् आमन्त्रयिष्यति।

(ई) पदसिद्धसदस्यान् विहाय समितेः सर्वे सदस्याः वर्षद्वयं पदं धारयिष्यन्ति।

(फ) समितेः अधिकाराः कर्तव्यानि च यथाविहितानि स्युः।

विद्यासेवा—अनुभागाय समितिः

4) अ) विद्यापीठस्य प्रत्येकं विद्यासेवी—अनुभागस्य काचन समितिः स्यात्। तस्याः अधिकारक्षेत्रेषु सेवानाम् आयोजनं तासां संरक्षण प्रचालनञ्चोति तस्याः कर्तव्यं भवेत्।

ब) ऐषाम् अनुभागानां समितौ अधोदत्ताः सदस्याः समाविष्टाः स्युः।

1) कुलीगुरुः — अध्यक्षः;

2) अधिष्ठातृभिः तेषु नामनिर्दिष्टः अधिष्ठाता;

3) अनुभागस्य सेवानां उपयोगं कुर्वतां विद्यापीठपरिसंस्थानां विभागानां वा नातित्रयः विद्वत्परिषदा नामनिर्दिष्टप्रमुखाः।

4) अनुभागं वित्तसाहाय्यं कुर्वत्याः संस्थायाः नामनिर्दिष्टः व्यक्तिः।

5) विद्यापीठकर्मचारिणः विहाय कुलगुरुणा नामनिर्दिष्टः संबद्धविद्या—विषयक—सेवानां विशेषज्ञः।

6) सम्बद्धविद्यासेवा—अनुभागप्रमुखः—अध्यक्ष—सचिवः।

क) नामनिर्दिष्टसदस्यानां कालावधिः पञ्चवर्षात्मकः भवेत्;

ड) समितेः अधिकाराः कर्तव्यानि च यथाविहितानि स्युः।

ई) वर्षावधौ समित्याः द्विवारं सभा भवेत्।

वास्तुरचना–समितिः

5) अ) वास्तुरचनासमितौ अधोदत्ताः सदस्याः भविष्यन्ति –

1) कुलगुरुः – अध्यक्षः

2) अधीक्षक–अभियन्ता–सार्वजनिक भवननिर्माण–विभागः तेन नामनिर्दिष्टः वा व्यक्तिः।

3) व्यवस्थापनपरिषदा नामनिर्दिष्टः वास्तुविशारदः

4) कुलगुरुणा नामनिर्दिष्टः विद्वत्परिषद्सदस्यः

5) कुलसचिवः

6) वित्त–लेखा–अधिकारी

7) विद्यापीठस्य प्रमुखः अभियन्ता सदस्य–सचिवः

ब) समितेः अधिकाराः कर्तव्यानि च यथाविहितानि स्युः।

छात्रकल्याण–समितिः

6) छात्रकल्याणसमितौ अधोदत्ताः सदस्याः समाविष्टाः स्युः।

1) कुलगुरुः – अध्यक्षः

2) समकुलगुरुः – उपाध्यक्षः

3) गतपदवीपरीक्षायां विद्याविषयकप्राविण्यप्राप्तः विद्यापीठे पूर्णकालिक–तया अधीयानः समकुलगुरुणा नामनिर्दिष्टः विद्यापीठस्य प्रत्येकं विभागतः विद्यार्थि–प्रतिनिधिः।

4) कुलगुरुणां नामनिर्दिष्टं विद्यार्थिनीद्वयम्।

5) अनुसूचितजातयः, अनुसूचितजातिसमूहाः अन्य–अप्रगतवर्गश्च इत्येतैः कुलगुरुणा क्रमेण नामनिर्दिष्टौ द्वौ विद्यार्थिप्रतिनिधी।

6) सञ्चालकः, छात्रकल्याणम्–सदस्य–सचिवः

कुलगुरुः, तस्यानुपस्थितौ समकुलगुरुः वा छात्रकल्याण समितेः प्रत्येकं सभायाः अध्यक्षः भवेत् । सभायाम् अस्याम् आवश्यकतानुसारम् अधिकारिणः उपस्थिताः भविष्यन्ति। मासत्रयेषु एकवारं सभा भविष्यति ।

क्लेश निवारण– समितिः

7) अ) विद्यापीठे, विद्यापीठस्य अध्यापकाः अन्ये कर्मचारिणश्च इत्येतेषां क्लेशापकरणार्थं दत्तावेदनस्योपरि कार्यवहनं कर्तुम् एका अपक्लेश–निवारण–समितिः भवेत्। अपक्लेश–निवारण–समितौ अधोदत्ताः सदस्याः भविष्यन्ति । –

1) समकुलगुरुः – अध्यक्षः;

2) व्यवस्थापनपरिषदा तत्सदस्येभ्यः नामनिर्दिष्टाः चत्वारः सदस्याः;

3) कुलसचिवः – सदस्य–सचिवः;

ब) कुलसचिवः मतदानस्य न अधिकारभाक् ।

क) न्यायाधिकरणस्य अधिकारबाह्यं क्लेशापकरणस्य आवेदनं स्वीकर्तुं विचारयितुम् अपक्लेश–निवारण–समितिः प्रतिबद्धा भवेत्। षट्सु मासेषु अपक्लेश–निवारणसमितिः क्लेशस्य निवारणं कुर्यात् निर्णयं च श्रावयेत् उचितकार्यान्वयनार्थं व्यवस्थापनपरिषदे इतिवृत्तं प्रदद्यात्। इतिवृत्तेऽस्मिन् व्यवस्थापनपरिषदः निर्णयः अन्तिमः भवेद् ।

**सप्तमं प्रकरणं समाप्तम्**

## अष्टमं प्रकरणम्

## विद्यापीठस्य अध्यापकाः कर्मचारिणश्च

55(1)(अ) अधिनियमेनानेन तदन्वयेन वा निर्मितेषु अध्यापकीय–अध्यापकेतरपदेषु नियुक्तयः केवलं गुणवत्ताधारितमेव भाविष्यन्ति। एषु 70 प्रतिशतं विभागशः नियुक्तयः, लिखितानुबन्धेन, पञ्चवर्षात्मकनियतावधौ स्युः। ईदृशी प्रत्येकं नियुक्तिः विद्यापीठस्य इच्छानुसारं नवीकर्तुं शक्यते। एषा च नियुक्तिः नवा इति मन्येत। — विद्यापीठस्य अध्यपकानां चयनं नियुक्तिश्च

(ब) अस्य अधिनियमस्य, परिनियमानां आदेशानां च प्रावधानाधीनत्वेन कुलगुरुः विद्यापीठ–अनुदान–आयोगस्य सेवाप्रवेशयोजनायाः कार्यान्वयनपर्यन्तं गुणवत्ताक्रमेण चयनसमित्या पुरस्सरत्वेन च विद्यापीठ–अध्यापकस्य नियुक्तिं कुर्यात्।

(2) विद्यापीठ–अध्यापकस्य नियुक्त्यर्थं पुरस्कर्तुं चयनसमितौ अधोदत्ताः सदस्याः समाविष्टाः स्युः।

अ) कुलगुरुः कुलगुरूणा निर्देशितः वा समकुलगुरुः–अध्यक्षः।

ब) कुलगुरुणा नामनिर्दिष्टः एकः व्यक्तिः।

क) सम्बद्धसंकायस्य अधिष्ठाता।

ड) विद्यापीठविभागस्य प्रमुखः संबद्धपरिसंस्थायाः प्रमुखः वा ।

इ) विद्यापीठेन सह सम्बद्धाः, तत्तद्विषयज्ञाः, विद्वत्परिषदा पुरस्कृतेषु न्यूनातिन्यूनं षट्सु विद्वन्नामसु व्यवस्थापनपरिषदा नामनिर्दिष्टाः त्रयः व्यक्तयः।

फ) कुलगुरुणा नामनिर्दिष्टः अनुसूचितजातिषु अनुसूचितसमूहेषु च एकः।

(3) कुलसचिवः, समितेः सचिवः भवेत्।

(4) चयनद्वारा विद्यापीठस्य अध्यापकानां प्रत्येकं पूरणीयस्य कुलगुरोः मान्यलेखानुसारं, विहितां न्यूनतम्–अर्हतानां अतिरिक्त अर्हतानां विवरणं वित्तलब्धिःपदानां संख्या च अनुसूचितजातिः–अनुसूचितसमूहः अन्यः अप्रगतवर्गः श्रेण्यादिषु व्यक्तिनां कृते संरक्षितपदानां संख्या–इत्यादिभिः सह यथोचितरीत्या सार्वत्रिकं विज्ञापनं भवेत्। एनम् विज्ञापनं कुलगुरुणा दत्तकालावधौ आवेदकाः आवेदनं पूरयेयुः।

(5) प्रत्येकम् आवेदकस्य च विवरणं चयनसमितेः प्रत्येकं सदस्यः सभायाः दिनाङ्कात् सप्तदिनानि प्राक् प्राप्येत।

(6) प्रत्येकं चयनसमितेः गणपूर्तिः सदस्यचतुष्टयेन स्यात्। तेषु चतुर्षु न्यूनातिन्यून द्वौ सदस्यौ उपनियम (2) इत्यस्य खण्ड–(इ) अन्वयेन नामनिर्दिष्टौ व्यक्ती स्याताम्।

न्यूनातिन्यूनं त्रिंशत् दिनेभ्यः प्राक् सभादिनाङ्कविषये चयनसमितिसदस्याः सूचनां प्राप्नुयुः।

तथापि, चयनसमितिः प्राध्यापकपदार्थं यैः आवेदनं कृतम् ये च साक्षात्कारार्थम् उपस्थिताः तान् विहाय यैः आवेदनं न कृतं न चापि उपस्थिताः साक्षात्काराय अपवादात्मकत्वेन विद्याक्षेत्रे असाधारणतया अंशदानं कुर्वन्तं व्यक्तिं लिखितरूपेण उल्लिख्य नियुक्त्यर्थं पुरस्कर्तुं शक्नुयात्।

प्रत्यक्षप्रतिकूलपरिणामभाजः व्यक्तेः विज्ञप्तिपत्रात् स्वतः वा आवश्यकतानुसारं पृच्छां कृत्वा वा यस्य अध्यापकस्य नियुक्तौ प्रतिकूलत– परिणामः भवेत तस्मात् अध्यापकात् स्पष्टीकरणं स्वीकृत्य कुलाधिपतिः यदि विश्वसिति यद् विद्यापीठस्य केनापि प्राधिकरणेन अधिकारिणा वा कृता अध्यापकस्य नियुक्तिः तत्कालीननियमान् अतिक्रम्य वर्तते तर्हि अध्यापकस्य सेवासम्बद्ध–अनुबन्धे यः कोऽपि नियमः भवतु कुलाधिपत्याः आदेशद्वारा तस्मै अध्यापकाय मासात्मकावधेः सूचनां प्रदाय तस्मै वेतनं वा प्रदाय तस्य नियक्तिं समापयितुं कुलगुरुम् आदिशेत्। कुलगुरुः च अविलम्बम् तमादेशम् अनुपालयेत् पुनश्च नियुक्तिप्रक्रियाम् आरभेत्। यस्याध्यापकस्य नियुक्तिः समापिता सोऽपि तत्पदार्थं आवेदयितुं पात्रः भवेत्।

(8) संलग्नपूर्ववर्ति–उपनियमान्वयेन कुलाधिपतिना प्रसृतः आदेशः अन्तिमः भवेत। आदेशस्य प्रतिः तत्प्राप्तेः दिनाङ्कात् दिनत्रयावधौ कुलगुरुः तस्मै सम्बद्धाय अध्यापकाय प्रदद्यात्।

(9) कस्मैचिद् व्यक्तये सेवासमाप्ति–अनन्तरं कस्मिन्नपि कालावधौ विद्यापीठनिधितः वेतनम् अथवा अतिरिक्तधनं न दीयते इति कुलगुरुणा द्रष्टव्यम्। तत्कुलगुरोः कर्तव्यम्। एतादृशं धनं ददानः प्राधिकरणं वा अधिकारी प्राधिकारी वा तदर्थं उत्तरदायी भवेत्।

विद्यापीठस्य अध्यापकानां अस्थायि रिक्त पदानां पूर्तिः

56) विद्यापीठस्य अध्यापकस्य अस्थायि–रिक्त पदेषु नियुक्तिः करणीया चेद् वर्षाधिककालावधौ पदे रिक्ते सति निकटपूर्ववर्तिनियमाननुसृत्य चयनसमितेः पुरस्कारमनुसृत्य नियुक्तिः भवेत्।

तथापि, अध्यापनदृष्ट्या रिक्तपदपूर्तिः अविलम्बम् करणीया इति विषये कुलगुरौ विश्वसिते अधोनिर्देशरचितायाः स्थानिक–चयन समितेः पुरस्कारमनुसृत्य नातीतवर्षात्मकावधौ अर्हताप्राप्तव्यक्तेः नियुक्तिः कुर्यात् कुलगुरुः व्यवस्थापनपरिषदं सूचयेत्।

1) कुलगुरुः – अध्यक्षः
2) सम्बद्धविद्याशाखायाः अधिष्ठाता
3) सम्बद्धविभागप्रमुखः

4) कुलगुरुणा नामनिर्दिष्टः तज्ज्ञः व्यक्तिः, तथापि विभागप्रमुखे अधिष्ठातरि सति कुलगुरु व्यक्तिद्वयं नामनिर्दिष्टं कुर्यात् ।

सञ्चालित महा— विद्यालयानां प्राचार्याणां नियुक्तिः चयनञ्च

57) सञ्चालितमहाविद्यालयानां प्राचार्याः विद्यापीठपरिसंस्थानां, पदव्युत्तर—केन्द्रोपकेन्द्राणां वा सञ्चालकाः वा प्रमुखाः वा इत्येतेषां नियुक्त्यर्थं विद्यमानायां चयनसमित्यां अधोदत्ताः सदस्याः समाविष्टाः स्युः ।

अ) कुलगुरुः — अध्यक्षः

ब) कुलगुरुणा नामनिर्दिष्टः व्यक्तिः

क) विद्यापीठेन सह असम्बद्धाः, व्यवस्थापनपरिषदा नामनिर्दिष्टौ द्वौ तज्ज्ञौ विद्वत्परिषदा नामनिर्दिष्टः तज्ज्ञः व्यक्तिः च ।

58) (1)(अ) अधोदत्तेषु पदेषु नियुक्त्यर्थं योग्यान् प्रत्याशिनः पुरस्कर्तुं चयनसमिति भवेत् —

1) कुलसचिवः

2) परीक्षा—नियन्त्रकः

3) वित्त—लेखा—अधिकारी

4) प्रधानः ग्रन्थपालः

(ब) चयनसमितौ अधोदत्तानां सदस्यानां समावेशः स्यात्

1) कुलगुरुः तन्निदेशेन समकुलगुरुः वा —इ अध्यक्षः;

2) व्यवस्थापनपरिषदा तत्सदस्येषु नामनिर्दिष्टौ द्वौ सदस्यौ;

3) कुलगुरुणा नामनिर्दिष्टः अधिष्ठाता यः व्यवस्थापनपरिषदः सदस्यः न स्यात् ।

4) विद्यापीठम् तत्संलग्नः कोऽपि महाविद्यालयः मान्यताप्राप्तपरिसंस्था इत्येतेषु असमम्बद्धौ रिक्तपदसम्बन्धिनं विशिष्टं ज्ञानं धारयन्तौ कुलगुरुणा नामनिर्दिष्टौ द्वौ तज्ज्ञौ ।

5) कुलगुरुणा नामनिर्दिष्टः अनुसूचितजातिसमूहाप्रगतवर्गेषु अन्यतमः व्यक्तिः ।

6) कुलसचिवः, यस्मिन् सः स्वयम् आवेदकः भवेत् तत्पदं विहाय अन्येषु विषयेषु चयनसमितेः सदस्य—सचिवरूपेण कार्यं कुर्यात्

(2) विद्यापीठस्य अन्येषाम् अधिकारिणां कृते चयनसमितिः नियुक्तेः पद्धतिः च यथाविहिता स्यात् ।

(3) संलग्नमहाविद्यालयानां प्राचार्याः अध्यापकाः अन्ये च कर्मचारिणः इत्येतेषां कृते चयनसमितिः नियुक्तेः पद्धतिः च यथाविहिता स्यात् ।

(4) संलग्नमहाविद्यालयस्य व्यवस्थापनं विहितपद्धत्या अध्यापकानां अन्यकर्मचारिणां च रिक्तपदानां पूर्तेः प्राक्, अन्येषु महाविद्यालयेषु समावेशयितुं विद्यापीठेन तसम्बद्धायाम् अतिरिक्त—व्यक्तीनां सूच्यां योग्यं व्यक्तिम् (अन्विष्येत्)

विद्यापीठम् उच्चशिक्षासञ्चालकः इत्येतेभ्यः संसूचनं च प्राप्नुयात्। अस्मिन् व्यक्तौ उपलब्धे सति व्यवस्थापनं तं व्यक्तिं नियोजयेत्।

अन्याः समितयः

59) अधिनियमेनानेन स्थापिताः समितीः विहाय विद्यापीठस्य प्राधिकरणानि विशिष्टकार्यार्थं उचितसमयनिर्बन्धैः सह अन्याः समितीः नियोजयितुं शक्नुयात्। एषु च समितिषु समितिं स्थापयतः प्राधिकरणस्य सदस्यानां प्राधिकरणेन नामनिर्दिष्टानां सदस्यानां च समावेशः भवेत्।

न्यायाधि–करणम्

60) नागपुर–विद्यापीठार्थं रचितं विद्यापीठमहाविद्यालयानां च प्राधिकरणं अस्य विद्यापीठस्य तत्संलग्नमहाविद्यालयानां विद्यापीठमान्यानां परिसंस्थानां पाठशालानां प्रयोजनार्थं न्यायाधिकरणं भवेत्। इति

**अष्टमं प्रकरणं समाप्तम्**

## अथ नवमं प्रकरणम्

## अनुज्ञा, संलग्नीकरणं मान्यता च

संलग्नीकरणं मान्यता चेत्यतदर्थं समयनिर्बन्धाः

61) संलग्नीकरणाय मान्यतायाः कृते आवेदयत् व्यवस्थापनं, यस्य व्यवस्थापनस्य महाविद्यालयाय परिसंस्थायै च पाठशालायै संलग्नीकरणस्य मान्यता प्रदत्ता तद् व्यवस्थापनं अधोदत्त विषयसन्दर्भे विश्वासं दद्यात् तस्य अनुपालनं कुर्यात्। –

अ) अधिनियमः तदधःस्थाः परिनियमाः, आदेशाः विनियमाश्च इत्येतेषां प्रावधानानां विद्यापीठस्य स्थायि–आदेशानां निदेशानां च पालनं क्रियते।

ब) उपनियम 65 गतानां प्रावधानानाम् अनुसारं संलग्न–महाविद्यालयस्य कृते स्वतन्त्र–स्थानिक–व्यवस्थापन–समितिः भवेत्।

क) पाठ्यक्रमार्थं लब्धप्रवेशविद्यार्थिनां संख्या विद्यापीठेन राज्यशासनेन काले काले विहितां मर्यादां नातिरिच्येत।

ड) यथाविहितं भवनं, प्रयोगशालाः, ग्रन्थालयाः, पुस्तकानि, अध्यापनार्थं संशोधनार्थं च आवश्यकी साधनसामग्री, वसतिगृहाणि, व्यायामशालाः इत्यादयः उचिताः पर्याप्ताः च भौतिकसुविधाः स्युः।

ई) महाविद्यालयस्य, परिसंस्थायाः पाठशालायाः वा वित्तीयसाधनानि निभालनार्थं संरक्षणार्थं अखण्डितकार्यवहनार्थं च पर्याप्तानि स्युः।

फ) संलग्नमहाविद्यालयाः, मान्यताप्राप्तपरिसंस्थाः, पाठशालाः वा इत्येतेषां अध्यापकानां अध्यापकेतरकर्मचारिणां च संख्या अर्हताश्च तथैव संलग्नमहाविद्यालयानां कर्मचारिणां सेवासमयनिर्बन्धाः वित्तलब्धिश्च विद्यापीठेन यथा विहिताः तथा स्युः। अथ च पाठ्यक्रमम् अध्यापनं प्रशिक्षणं संशोधनं च समर्थतया सञ्चालयितुं पर्याप्ता भवेत्।

ग) संलग्नमहाविद्यालयस्य सर्वेषाम् अध्यापकानाम् अध्यापकेतरकर्मचारिणां च सेवाः तत्महाविद्यालयस्य सुविधाः च परीक्षार्थं विद्यापीठस्य अन्यकार्यक्रमार्थं उपलब्धा क्रियन्ते।

आय) विद्यापीठस्य पूर्वानुमतिं विना व्यवस्थापने किमपि परिवर्तनं स्थानान्तरणं वा न भविष्यति।

ज) विद्यापीठस्य अनुमतिं विना महाविद्यालयः परिसंस्था पाठशाला वा न निरस्यते?

के) उपनियम 71 अन्वये महाविद्यालयः परिसंस्था वा पाठशाला वा इत्येतस्य संलग्नीकरणे निरस्ते, मान्यतायां समाप्तायां वा तस्य निरसने वा राज्यशासनेन विद्यापीठानुदानायोगेन वा प्रदत्तात् धनात् निर्मिताः महाविद्यालयस्य परिसंस्थायाः पाठशालायाः वा भवनानि साधनसामग्रीणा सह सर्व सम्पद् च राज्यशासने निहिता भवेत्।

अनुमति विषयिकी कार्यपद्धतिः

62(1) विशेषतः, विद्यापीठस्य अधिकारितायां सेवारहितस्य अल्पविकसितस्य क्षेत्रस्य आवश्यकताः विचार्य उच्चशिक्षायाः सुविधानां समन्यायविभाजनं निश्चितं भवेत्। उच्चशिक्षायाः सुविधानां समन्यायविभाजनं निश्चितं यथा स्यात् तथा उच्चशिक्षायाः परिसंस्थानां स्थानानि निश्चेतुं विद्यापीठं शिक्षाविकासस्य उद्दिष्टनिष्ठां योजनां कुर्यात्। योजना एषा नियोजन—विकास—मण्डलं करिष्यति। विद्वत्परिषदि च तां योजनां प्रस्तोष्यति। प्रतिपञ्चवर्षेषु अस्यां योजनायां परिवर्तनमावश्यकम्।

(2) अनया योजनया सह असंगतः उच्चशिक्षायाः नवीनमहाविद्यालयः परिसंस्था वा प्रारब्धुं आवेदनं विद्यापीठं न स्वीकरिष्यति।

(3) उच्चशिक्षायाः नवीनः महाविद्यालयः परिसंस्था वा प्रारब्धुं याचमानं व्यवस्थापनं यस्मिन् वर्षे अनुमतिम् इच्छति तस्य वर्षस्य प्राक्तनवर्षस्य ऑक्टोबरमासस्य अन्तिमदिनाङ्कात् पूर्वं कुलसचिवमुद्दिश्य विहितप्रपत्रे आवेदनं कुर्यात्।

(4) पूर्वोक्तविहितकालमर्यादायां प्राप्तानां सर्वेषाम् आवेदनपत्राणां चयनं नियोजन—विकास—मण्डलं करिष्यति। तन्मतेन उचितपुरस्कारैः सह तानि आवेदनपत्राणि सम्बद्धकारणैः यथोचितरीत्या परिपोष्य तस्य वर्षस्य डिसेंबरमासस्य अन्तिमदिनाङ्कात्पूर्वं वा राज्यशासनं प्रति प्रेषिष्यन्ते।

(5) विद्यापीठेन पुरस्कृतेषु आवेदनपत्रेषु, राज्यशासनं स्वस्य निरपवादस्वेच्छानिर्णयानुसारं उचिताय महाविद्यालयाय परिसंस्थायै वा अनुमतिं दद्यात्। तदानीं राज्यशासनं राज्यशासनस्य अर्थसंकल्पीया साधनसम्पदः, नवीनं महाविद्यालयं परिसंस्थां वा याचमानस्य व्यवस्थापनस्य योग्यायोगत्वस्य उच्चशिक्षायाः परिसंस्थायाः स्थाननिश्चयनसम्बन्धस्य राज्यस्तरीयमग्रक्रमं विचारयेत्।

तथापि अपवादात्मकप्रकरणेषु कारणानि लिखित्वा च राज्यशासनं उच्चशिक्षायाः नवीन—महाविद्यालयार्थं परिसंस्थार्थं वा आगताय विद्यापीठेन अपुरस्कृताय आवेदनपत्राय अनुमतिं प्रदातुं शक्ष्यति

(6) उच्चशिक्षार्थं नवीनं महाविद्यालयं परिसंस्थां वा प्रारब्धुम् साक्षात् आगतं आवेदनपत्रं राज्यशासनं विचारयितुं न स्वीकुर्यात्।

संलग्नी—करणस्य कार्यपद्धतिः

63 (1) नियम (62) अन्वयेन राज्यशासनात् प्राप्तायाम् अनुमत्यां, विद्यापीठस्य विद्वत्—परिषद् उपनियम(2) अन्वयेन विहितकार्यपद्धतिमनुसृत्य, नवीनमहाविद्यालयेन अनुबन्धनिविष्ट—समयनिर्बन्धानां पालन कृतं वा, कियत् पालनं कृतम् इति सम्यक् विचार्यं प्रथमवारं महाविद्यालयस्य संलग्नीकरणाय मान्यतां प्रदद्यात्। अस्मिन् सम्बन्धे विद्वत्—परिषदः निर्णयः अन्तिमः स्यात्।

(2) संलग्नीकरणस्य मान्यताविषयकस्य आवेदनपत्रस्य विषये विचारयितुं विद्वत्परिषद् तया रचितया समित्या पृच्छायाः व्यवस्थां कुर्यात्।

(3) अधोदत्तेषु विषयेषु विद्वत्—परिषद् निर्णयं करिष्यति —

अ) संलग्नीकरणाय मान्यता प्रदेया उत न प्रदेया ।

ब) पूर्णतः संलग्नीकरणाय मान्यता प्रदेया उत अंशतः ।

क) विषयः, पाठ्यक्रमः, विद्यार्थिनां प्रवेशसंख्या ।

ड) संलग्नीकरणस्य मान्यताप्रदानसमये वा समयान्तर्भवनयोग्याः कोऽपि समयनिर्बन्धाः ।

(4) संलग्नीकरणाय मान्यतायां प्रदत्तायां विद्वत्परिषदः निर्णयं कुलसचिवः अग्रिमसूचनाभिः सह व्यवस्थापनाय संसूचयेत् तस्य च एका प्रतिः उच्चशिक्षायाः सञ्चालकं प्रेषयेत् —

अ) संलग्नीकरणाय मानताप्राप्तविषयाः पाठ्यक्रमाश्च

ब) विद्यार्थिनां प्रवेशसंख्या

क) येषाम् अधीनत्वेन मान्यता प्रदत्ता ते समयनिर्बन्धाः ।

(5) नियम 62 इत्यत्र निर्देशिता कार्यपद्धतिः उचितपरिवर्तनैः सह नवीन पाठ्यक्रमः, अतिरिक्ताः विद्याशाखाः नवीनविषयः, अतिरिक्ताः उपविभागाः इत्येतेषां प्रारम्भस्य अनुमतिविषये भविष्यति ।

(6) यावत् विद्यापीठं महाविद्यालयाय संलग्नतां न प्रददाति तावत् महाविद्यालयः कस्मैः अपि विद्यार्थिने प्रवेशं न दद्यात ।

(7) उप—नियम 1 तः 4 मध्ये निर्दिष्टा कार्यपद्धतिः उचितैः परिवर्तनैः सह काले काले संलग्नीकरणसातत्यार्थं उचिता ।

परिसंस्थानां शालानां च कृते मान्यता—दानस्य कार्यपद्धतिः

64 (1) न्यूनातिन्यूनं पञ्चवर्षीयं संशोधनं विशिष्टं पाठ्यक्रमम् इच्छन्त्याः तदर्थं मान्यतां च वाञ्छन्त्याः परिसंस्थायाः व्यवस्थापनं अधोदत्तेषु विषयेषु संपूर्णया सूचनया सह विद्यापीठस्य कुलसचिवं प्रति आवेदनं कुर्यात्

अ) व्यवस्थापनस्य रचना तस्य कर्मचारिवर्गश्च ।

ब) येषां विषयाणां पाठ्यक्रमाणां च कृते मान्यता अपेक्षिता ते विषयाः पाठ्यक्रमाश्च ।

क) यदर्थं प्रावधानं कृतं तत् स्थानं, साधनसामग्री, विद्यार्थिसंख्या च ।

ड) संशोधनाय मार्गदर्शनार्थं मान्यताप्राप्ता अथवा संशोधनाय विद्यापीठेन मान्याताहार्याः परिसंस्थायाः स्थायि—अभ्यागत—मानसेवि— कर्मचारीवर्गः, तेषामनुभवः, परिसंस्थया कृतानां संशोधनानां प्रमाणानि, परिसंस्थायाः प्रकाशनानि, इतिवृत्तं, प्रबन्धिका, पुस्तकानि च ।

ई) स्वीक्रियमाणं शुल्कं, प्रस्तावितं वा शुल्कं भवनानि—साधनसामग्री—इत्येतेषां कृते परिसंस्थायाः सातत्यार्थं तस्याः समर्थकार्यान्वयनार्थं धनव्ययस्य प्रावधानम् ।

(2) ईदृशस्य आवेदनपत्रस्य विषये विमर्शात् प्राक् नियोजन—विकास—मण्डलं आवश्यकतानुसारं अधिकां सूचनां पृच्छेत् ।

(3) नियोजन—विकास—मण्डलं यदि आवेदनपत्रविषये विचारयति तर्हि सम्बद्धस्य विषयस्य क्षेत्रस्य वा विशेषज्ञेन विशेषज्ञैः वा स्थानिकपृच्छां कारयेत्। अस्याः समित्याः इतिवृत्तं विचार्य आवश्यकतानुसारं अधिकां पृच्छां कृत्वा नियोजन—विकास—मण्डलं आवेदनपत्रं पूर्णतः अंशतः वा स्वीकारस्य अथवा अस्वीकारस्य प्रस्तावः विद्वत्परिषदं प्रति प्रेषयेत्।

(4) उक्तमण्डलेन प्रस्तुते प्रस्तावे विचार्य विद्वत्—परिषद् तं स्वीकुर्यात् अथवा न स्वीकुर्यात् विषयेऽस्मिन् विद्वत्परिषदः निर्णयः अन्तिमः स्यात्।

(5) पाठशालायाः मान्यतायाः पद्धतिः ईदृशी स्यात् —

न्यूनातिन्यूनं वर्षद्वयं यावत् संस्कृताध्यापने सक्रियकार्यरतायाः मान्यतां च याचमानायाः पाठशालायाः व्यवस्थापनम् अधोदत्तानां विषयाणां संपूर्णविवरणेन सह कुलसचिवं प्रति आवेदनं कुर्यात् —

अ) व्यवस्थापनस्य रचना, तस्य कर्मचारिवर्गः

ब) येषां विषयाणां पाठ्यक्रमाणां च कृते मान्यता अपेक्षिता ते विषयाः पाठ्यक्रमाश्च;

क) यदर्थं प्रावधानं कृतं तत् स्थानं, साधनसामग्री, विद्यार्थिसंख्या च।

ड) स्थायि—अभ्यागत—मानसेवि—कर्मचारिवर्गः, तेषाम् अर्हताः प्रकाशनानि इत्यादिविषयसम्बद्धं विवरणम्।

ई) स्वीक्रियमाणं प्रस्तावितं वा शुल्कं, भवनानि, साधनसामग्री इत्येतेषां धनव्ययार्थं पाठशालायाः कार्यसातत्यार्थं प्रावधानम्।

फ) ईदृशस्य आवेदनपत्रस्य विषये विमर्शात् प्राक् नियोजन——विकास—मण्डलम् आवश्यकतानुसारं अधिकं विवरणं पृच्छेत्।

ग) नियोजन—विकास—मण्डलं यदि आवेदनपत्रविषये विचारयति तर्हि सम्बद्धस्य विषयस्य क्षेत्रस्य वा विशेषज्ञेन विशेषज्ञैः वा स्थानिकपृच्छां कारयेत्। अस्याः समित्याः इतिवृत्तं विचार्य आवश्यकतानुसारं अधिकां पृच्छां कृत्वा नियोजन—विकास—मण्डलं आवेदनपत्रस्य पूर्णतः अंशतः वा स्वीकारस्य अथवा अस्वीकारस्य प्रस्तावः विद्वत्परिषदं प्रति प्रेषयेत्।

ह) नियोजन—विकास—मण्डलेन प्रस्तुतं प्रस्तावं विचार्य विद्वत्—परिषद् तं स्वीकुर्यात् अथवा न स्वीकुर्यात् वा तदनुसारं व्यवस्थापन—परिषदं सूचयेत्।

65 (1) प्रत्येकं संलग्नमहाविद्यालयार्थं परिसंस्थायै वा स्वतन्त्रा स्थानिक—व्यवस्थापन—समितिः स्यात्। तस्यां अधोदत्ताः सदस्याः स्युः—

संलग्न महा—विद्यालयस्य परिसंस्थानां च स्थानिक व्यवस्थापनम् अथवा विमर्श

अ) व्यवस्थापनस्य अध्यक्षः वा सभापतिः — अध्यक्षः;

ब) व्यवस्थापनस्य सचिव, तेन वा नामनिर्दिष्टव्यक्तिः;

क) व्यवस्थापनेन नामनिर्दिष्टः तत्क्षेत्रस्थविविधकार्यक्षेत्रेषु प्रतिनिधित्वं कुर्वन्तः त्रयः व्यक्तयः।

ड) ज्येष्ठताक्रमेण महाविद्यालयस्य परिसंस्थायाः वा त्रयः अध्यापकः।

ई) महाविद्यालयस्य परिसंस्थायाः अध्यापकेतरकर्मचारिवर्गेण निर्वाचितेषु कर्मचारिषु ज्येष्ठताक्रमेण चतुर्थवर्गेतर–अध्यापकेतर–कर्मचारी।

फ) प्राचार्यः, सदस्य–सचिवः।

(2) शासनेन स्थानिकप्राधिकरणेन वा व्यवस्थापितस्य सञ्चालितस्य च महाविद्यालयस्य परिसंस्थायाः वा स्थानिक–परामर्श–समितौ अधोदत्ताः सदस्याः स्युः –

1) उच्चशिक्षाविभागस्य सञ्चालकः तेन वा नामनिर्दिष्टः सहसञ्चालकः उपसञ्चालकः वा।

2) उच्चशिक्षाविभागस्य सञ्चालकेन नामनिर्दिष्टाः विविधकार्यक्षेत्राणां कार्याणां वा प्रतिनिधित्वं वहन्तः त्रयः जनाः।

3) महाविद्यालयस्य परिसंस्थायाः अध्यापकैः नामनिर्दिष्टाः त्रयः अध्यापकाः।

4) महाविद्यालयस्य परिसंस्थायाः चतुर्थवर्गेतर अध्यापकेतरकर्मचारिणां प्रतिनिधिः।

5) प्राचार्यः, सदस्य–सचिवः;

(3) स्थानिक–व्यवस्थापन–समितेः परामर्श–समितेः वा वर्षाभ्यन्तरे न्यूनातिन्यूनं सभाद्वयं भविष्यति।

(4) निर्वाचितानां नामनिर्दिष्टानां वा सदस्यानां पदावधिः वर्षत्रयात्मकः भवेत्।

(5) स्थानिक–व्यवस्थापन–समितेः परामर्शसमितेः वा अधिकाराः कर्तव्यानि च अधोदत्तानि स्युः। –

अ) अर्थसंकल्पः वित्तीयविवरणपत्राणि च सिद्धानि करणीयानि;

ब) अध्यापकीयानि अन्यानि पदानि निर्मातुं व्यवस्थापनं प्रति पुरस्कारः।

क) शिक्षणस्य अन्तर्गत–मूल्यमापनस्य कार्यक्रमाः निश्चेतव्याः; महाविद्यालये शिक्षणस्य प्रगतेः चर्चा कर्तव्या।

ड) महाविद्यालये अध्यापनस्य स्तरं वर्धयितुं व्यवस्थापनं प्रति पुरस्कारः।

इ) महाविद्यालयस्य अर्थसंकल्पे अकृतप्रावधानस्य नूतनव्ययस्य प्रस्तावः।

फ) विविधवर्गाणां प्रवेशक्षमता, समयसारणिः, अध्यापनस्य उपलब्धकार्यभारस्य विभाजनं इति विषयेषु प्राचार्येण काले–काले समित्याः पुरतः विचारार्थं प्रेषयितेषु, महाविद्यालयस्य अन्तर्गत–व्यवस्थापनं महाविद्यालयस्य विद्यार्थिनाम् अनुशासनं च विषयैः सम्बद्धेषु बिन्दुषु च प्राचार्याय मार्गदर्शनम्।

ग) कञ्चिदपि निरीक्षणेतिवृत्तविषये विचारः तद्विषये पुरस्कारश्च।

ह) स्थानीय–पृच्छा–समितेः इतिवृत्तविषये विचारः तद्विषये पुरस्कारः च।

आय) जूनमानसस्य 30 दिनाङ्के सम्पद्यमान—वर्षार्थं समितेः कार्यस्य वार्षिक—इतिवृत्तं सिद्धं करणीयं, व्यवस्थापनं, विद्यापीठस्य व्यवस्थापन—परिषदं प्रति, सञ्चालक प्रति च प्रेषणीयम्

ज) व्यवस्थापनेन विद्यापीठेन च दत्तानि अन्यानि कार्याणि करणीयानि, अन्येषाम् अधिकाराणां च उपयोगः करणीयः

संलग्नता सातत्यम् अथवा मान्यता सातत्यम्

66. संलग्नमहाविद्यालयाय, मान्यताप्राप्तपरिसंस्थायै, पाठशालायै वा यस्यार्थं संलग्नीकरणाय अनुमतिः मान्यता वा प्रदत्ता तत्पाठ्यक्रमार्थं संलग्नीकरणस्य मान्यतायाः वा नैरन्तर्याय, संलग्नीकरणस्य मान्यतायाः वा षण्मासात् प्राक् आवेदनं कुर्यात्। यावत् पर्यन्तं संलग्नीकरणस्य मान्यता वा नैरन्तर्यं भवेत् तावत्पर्यन्तं विद्यापीठ—परिनियमेषु विहितकार्यपद्धतेः पालनं च कुर्यात्।

संलग्नस्य मान्यतायाः व्याप्ति—वर्धनम्

67. संलग्नमहाविद्यालय मान्यताप्राप्तपरिसंस्था पाठशाला वा अतिरिक्तपाठ्यक्रमार्थं संलग्नीकरणार्थं मान्यतार्थं वा आवेदनं कर्तुं शक्नोति। विद्यापीठं नियमाः 61,63,64 इत्येतेषु विहितां कार्यपद्धतिं परिपालयेत् यावत् तस्याः अधिकारसीमा भवेत्।

स्थायी संलग्नता मान्यता च

68. न्यूनातिन्यूनं षट्वर्षाणि संलग्न महाविद्यालयाः, परिसंस्थाः पाठशालाः वा स्थायिसंलग्नीकरणार्थं स्थायिमान्यतायै आवेदनं कर्तुं शक्नुवन्ति। नियोजन—विकास—मण्डलं आवेदनपत्रस्य विचारं कुर्यात्। तस्य परीक्षणं कृत्वा विद्वत्परिषदं प्रति च तस्य पुरस्कारं कुर्यात्। संलग्नमहाविद्यालयः मान्यताप्राप्तपरिसंस्था वा पाठशाला वा संलग्नीकरणस्य मान्यतायाः समयनिर्बन्धान् पालयति विद्यापीठेन काले—काले विहितः उच्चशिक्षायाः प्रशासनस्य च स्तरः अधिगतः वा इति विषये निश्चयं कृत्वा एव विद्वत्परिषद् तं महाविद्यालयं तां परिसंस्थां पाठशालां वा यथास्थितिः स्थायिसंलग्नीकरणं स्थायिमान्यतां वा प्रदद्यात्।

69. (1) महाविद्यालयस्य मान्यताप्राप्तपरिसंस्थायाः विद्याविषयकः स्तरः विद्याविषयकः संलग्नप्रशासनस्य स्तरश्च इतिविषयकं निर्णयं कर्तुं विद्यापीठं शक्नुयात् इत्यतः विद्यापीठं यथा निर्देशं दद्यात् तथा इतिवृत्तं विवरणं अन्याश्च सूचनाः प्रत्येकं महाविद्यालयः परिसंस्था पाठशाला वा प्रस्तुवीत।

(2) कुलगुरुः प्रत्येकं विद्यापीठविभागस्य, परिसंस्थायाः, वा, तदर्थं नियुक्तया समितया समितिभिः वा प्रतिवर्षत्रयं न्यूनातिन्यूनमेकवारं परीक्षणं कुर्यात्।अस्यां समितौ अधोदत्ताः सदस्याः स्युः। —

अ) नियोजन—विकास—मण्डलस्य सञ्चालकः कुलगुरुणा नामनिर्दिष्ट वा अधिष्ठाता — अध्यक्षः

ब) विद्वत्परिषदा नामनिर्दिष्टः विद्यापीठेन सह असम्बद्धः तज्ज्ञः

क) व्यवस्थापनपरिषदा नामनिर्दिष्टः तज्ज्ञः। एतेषु कोऽपि सदस्य सम्बद्धमहाविद्यालयेन, परिसंस्थया, पाठशालया वा सह सम्बद्धः न स्यात्।

(3) समिति तस्याः इतिवृत्तं कुलगुरुं प्रति विचारार्थं उपनियमक्रमाङ्क 14 अन्वयेन आवश्यककार्यवहनार्थं प्रेषयेत्।

संलग्नतायाः अथवा मान्यतायाः निष्कासनम्

70 (1) संलग्नमहाविद्यालयः मान्यताप्राप्तपरिसंस्था पाठशाला वा नियमक्रमाङ् 61 गतान् प्रावहितान् संलग्नीकरणस्य मान्यतायाः समयनिर्बन्धान् अनुसर्तुं, नियम क्रमाङ् 65 गतप्रावधानानुसारं स्थानिकव्यवस्थापनसमित्या परामर्शसमित्या वा अपेक्षितं यथोचितरीत्या कार्यं न कुर्यात् सञ्चालनपद्धत्या विद्यापीठस्य वा हितसम्बन्धेषु तेन निश्चिते स्तरे वा बाधां कुर्यात् तर्हि नियोजन–विकास–मण्डलं सम्बन्धि–महाविद्यालयाय परिसंस्थायै पाठशालायै वा पूर्णतः वा अंशतः वा विशेषाधिकारनिरसनार्थं पृच्छन्तीं सूचना व्यवस्थापनाय प्रेषयेत्।

(2) नियोजन–विकास–मण्डलं उपर्युक्तं कार्यवहनं किमर्थं निश्चितम् इत्यस्मिन् विषये कारणानि उल्लिख्य सूचनायाः प्रतिमेकां महाविद्यालयस्य प्राचार्यं परिसंस्थायाः पाठशालायाः वा प्रमुखं प्रति प्रेषयेत्। तस्य सूचनायाः उत्तररूपेण व्यवस्थापनेन लिखितं निवेदनं कति दिनेषु प्रेषणीयमित्यस्य उल्लेखः स्यात्। तदर्थं त्रिंशत् दिनानां मर्यादा स्यात्।

(3) लिखितं निवेदनं प्राप्य अथवा उपनियम क्र.1 अन्वयेन प्रेषितायाः सूचनायाः कालसमाप्त्यनन्तरं नियोजन–विकास–मण्डलं, विशेषाधिकारनिरसनस्य परिवर्तनस्य वा प्रस्तावेण सह वा सूचनां, विना लिखितं निवेदनं यदि स्यात् तन्निवेदनं विद्वत्परिषदः पुरतः प्रस्तुवीत।

(4) महाविद्यालयस्य मान्यताप्राप्तपरिसंस्थायाः पाठशालायाः विद्यार्थिनां हितं मनसि निधाय विद्वत्परिषद् कुलगुरुं प्रति अस्मिन्सन्दर्भे करणीयस्य कार्यवहनस्य पुरस्कारं कुर्यात्। कुलगुरुः च तदनन्तरं तस्य पुरस्कारस्य कार्यान्वयनं कुर्यात्।

महा–विद्यालयस्य मान्यताप्राप्त संस्थायाः पाठशालायाः वा पिधानम्

71 (1) राज्यशासनस्य विद्यापीठस्य च पूर्वानुमतिं विना महाविद्यालयस्य मान्यताप्राप्तपरिसंस्थायाः पाठशालायाः वा कस्मैचिदपि व्यवस्थापनाय महाविद्यालयस्य, परिसंस्थायाः पाठशालायाः वा पिधानस्य अनुमतिः न दीयेत।

(2) महाविद्यालयं, प्राप्तमान्यतापरिसंस्थां पाठशालां पिधातुं वाञ्छत् व्यवस्थापनं प्राक्तनवर्षस्य ऑगस्टमासस्य प्रथम दिनाङ्के तत्पूर्वं वा (महाविद्यालयस्य, परिसंस्थायाः पाठशालाया) पिधानस्य सर्वाणि कारणानि विलिख्य, भवनसाधनसामग्रीरूपेण धनम्, आद्यमूल्यं प्रचलितं विपणिमूल्यं, विद्यापीठानुदानायोगेन, राज्यशासनेन वा सार्वजनिक–वित्त–पूरणसंस्था प्राप्तानुदानं इत्यादीनां निर्देशं कृत्वा विद्यापीठाय आवेदनं कुर्यात्।

(3) ईदृशम् आवेदनपत्रं प्राप्य महाविद्यालयं मान्यताप्राप्तपरिसंस्थां पाठशालां पिधातुं अनुमतिः दीयेत न वा इत्यस्य मूल्यमापनं कर्तुं निश्चेतुं च विद्वत् परिषद् तन्मतानुसारं पृच्छायाः व्यवस्थां कुर्यात् । आवश्यकं साहाय्यं दत्त्वा विद्यापीठं महाविद्यालयं परिसंस्थां पाठशाला वा स्वाधीनां कृत्वा वा अथवा अन्यस्मै व्यवस्थापनाय हस्तान्तरितां वा कृत्वा संस्थायाः पिधानं कथं परिहरणीयम् इत्यस्मिन् विषये विद्वत्परिषद् परीक्षणं कुर्यात् ।

(4) विद्वत्परिषदा महाविद्यालयस्य मान्यताप्राप्तसंस्थायाः पाठशालायाः वा पिधानस्य अग्रेषणस्य निश्चयः कृतश्चेत् विद्वत्परिषद् अधोनिर्दिष्टविषयाणामन्तर्भावं कृत्वा इतिवृत्तं सिद्धं कुर्यात्। व्यवस्थापनाद्ग्राह्य हानिपूर्तेः धनं वा हानिपूर्तेः धनस्य प्रमाणम्। विद्यापीठ–अनुदान–आयोगात् राज्यशासनात् अन्यसार्वजनिकवित्तीयसाहाय्यं प्रददत्याः संस्थायाश्च प्राप्तार्थसाहाय्यात् निर्मितायाः सम्पदः हस्तान्तरणं विद्यापीठाय व्यवस्थापनाय वा करणीयं वा न वा तथा सेवामुक्तेभ्यः कर्मचारिवर्गाय च हानिपूर्तये दीयमानं धनम् ।

(5) तदनन्तरं विद्वत्परिषद् व्यवस्थापनपरिषदः पूर्वसहमत्या राजशासनस्य मान्यतया संलग्नमहाविद्यालयाय, मान्यताप्राप्तपरिसंस्थायै, पाठशालायै वा तं महाविद्यालयं तां परिसंस्थां पाठशालां वा पिधातुम् अनुमतिः दातव्या न वा इति निश्चिनुयात् ।

(6) यदा विद्यापीठं तं महाविद्यालयं तां मान्यताप्राप्तपरिसंस्थां वा पाठशालां वा स्वाधीनां कर्तुं वा अन्यस्मै व्यवस्थापनाय हस्तान्तरणीयां कर्तुं निश्चितं कुर्यात् तदा तस्मिन् विषये अनुसरणीया कार्यपद्धतिः यथाविहिता स्यात् ।

(7) महाविद्यालये, मान्यताप्राप्तपरिसंस्थायां पाठशालायां वा प्रविष्टानां विद्यार्थिनां हानिः न भूयाद् इत्येतदर्थं महाविद्यालयाः मान्यताप्राप्तपरिसंस्थाः पाठशालाः वा क्रमेण पिहिताः स्युः। आदौ प्रथमवर्षस्य प्रवेशाः स्थगिताः स्युः। कस्मै अपि प्रवेशः न देयः। (महाविद्यालयस्य मान्यताप्राप्तपरिसंस्थायाः पाठशालायाः वा) क्रमेण पिधानस्य पद्धतिः यथाविहिता स्यात् । इति ।

**नवमं प्रकरणं समाप्तम् ।**

## दशमं प्रकरणम्

## पञ्जीयनम्, उपाधयः, दीक्षान्तसमारोहश्च

पदव्युत्तरम् अध्यापनं संशोधनं च

72. सर्वं स्नातकोत्तर–उपाधिशिक्षणम् अध्यापनं, प्रशिक्षणं संशोधन कार्यं च विद्यापीठेन संलग्नमहाविद्यालयैः प्राप्तमान्यतापरिसंस्थाभिः पाठशालाभिः च सामान्यतः विद्यापीठक्षेत्रे विहितपद्धत्या सञ्चाल्यते ।

विद्यार्थिनां पञ्जीकरणम्

73. विद्यापीठविद्यार्थी इति आत्मनः पञ्जीयनं कर्तुम् इच्छन् विहिताः अर्हताः विहितान् समयान् च पूरयिष्यति ।

अनुशासन–विषयक–अधिकारः विद्यार्थिनाम् अनुशासनम्

74. 1) विद्यापीठस्य विद्यार्थिभिः सह सम्बद्धम् अनुशासनं अनुशासनभङ्गे च कार्यवाहनम् इत्येत्याभ्यां सम्बद्धाः सर्वे अधिकाराः कुलगुरौ निहिताः ।

2) ओदशाद्वारा कुलगुरुः सर्वान् एतान् वा अन्यान् अधिकारान् तन्मतेन योग्ये अधिकारिणि तस्य नामनिर्देशनं कृत्वा निहितुम् अर्हति ।

3) स्वाधिकारान् उपयुज्य, कुलगुरुः आदेशद्वारा विद्यार्थिनः विद्यार्थिनां वा निष्कासनं कर्तुमर्हति, विनिर्दिष्टकालावधिपर्यन्तं तस्य तेषां वा निष्कासनं; महाविद्यालयस्य, परिसंस्थायाः विद्यापीठविभागस्य एकस्मै वा एतेभ्यः वा पाठ्यक्रमार्थं विनिर्दिष्टकालावधौ प्रवेशस्थगनं/निषेधं; नातित्रिशत–रूप्यकाणां दण्डम् अथवा विभागः विद्यापीठसञ्चालितमहाविद्यालयः परिसंस्था वा इत्येतैः आयोजितासु परीक्षासु आयोजितायां परीक्षायां वा नातिपञ्चवर्षाणां प्रवेशनिषेधं वा विद्यार्थी–विद्यार्थिनः यां परीक्षां परीक्षाः दत्ता दत्ताः वा तस्याः परीक्षायाः तासां परीक्षाणां वा, तस्य वा तेषां वा परिणाम निरसनं कर्तुं निर्देष्टुम् अर्हति ।

तथापि, अस्मिन् विद्यार्थिनि वर्षाधिककालावधये निष्कासिते सति कुलगुरुः तस्मै विद्यार्थिने स्वपक्षस्थापनाय अवसरं प्रदद्यात् ।

4) कुलगुरोः अधिकाराणाम् अबाधित्वे, सञ्चालितमहाविद्यालयानां प्राचार्याः विद्यापीठस्य परिसंस्थायाः प्रमुखाः विद्यापीठविभागप्रमुखाश्च इत्येते स्वप्रभावक्षेत्रगतानां विद्यार्थिनां विषये अनुशासनपालनाय आवश्यकान् सर्वान् अधिकारान् प्रयोक्तुम् अधिकारिणः ।

5) व्यवस्थापनपरिषदः मान्यतायाः अधीनत्वेन कुलगुरुः विद्यापीठस्य विद्यार्थिनाम् अनुशासनपालनं योग्यवर्तनञ्च इत्येतयोः विषययोः नियमान् करिष्यति, ते च नियमाः विद्यापीठस्य सर्व सञ्चालितमहाविद्यालयानां विद्यापीठविभागानां विद्यार्थिनां कृते बन्धनकराः भवेयुः । प्रत्येकं च विद्यार्थी एषां नियमानां सूचिं प्राप्नुयात् ।

6) विद्यापीठसञ्चालितमहाविद्यालयानां प्राचार्याः परिसंस्थायाः प्रमुखाः तन्मतेन आवश्यकतानुसारं कुलगुरुकृतैः नियमैः सुसङ्गतान् अनुशासनपालनयोग्यवर्तन–

विषयकपूरकान् नियमान् करिष्यन्ति। प्रत्येकं च विद्यार्थिभ्यः तेषां नियमानां सूचिं दद्यात्।

7) प्रवेशसमये प्रत्येकं विद्यार्थी स्वयं कुलगुरोः, विद्यापीठस्य इतरेषाम् अधिकारिणां प्राधिकरणमण्डलानां च सञ्चालितमहाविद्यालयानां परिसंस्थानां तेषां प्राधिकरणमण्डलानां अनुशासनविषयकाणां अधिकाराणाम् अधीनत्वेन, कुलगुरूणा कृतानां तद्विषयकनियमानां सञ्चालितमहाविद्यालयानां प्राचार्यै, विद्यापीठपरिसंस्थानां प्रमुखैः कृतानां पूरकनियमानां यावद् अधिकारक्षेत्रं वर्तते तावत्पर्यन्तं पालनं करिष्यति 'ते नियमाः तस्मै बन्धनकराः' इत्याशयस्य प्रतिज्ञापत्रे स्वाक्षरीं कुर्यात्।

8) विद्यापीठद्वारा न सञ्चाल्यमानानां संलग्नमहाविद्यालयानां मान्यताप्राप्तपरिसंस्थानां पाठशालानां विद्यार्थिषु क्रियमाणाभिः अनुशासनभङ्गविषयककार्यवाहिभिः सम्बद्धाः सर्वाधिकाराः संलग्नमहाविद्यालयानां प्राप्तमान्यतापरिसंस्थानां प्राचार्याः प्रमुखाश्च इत्येषु निहिताः स्युः। पूर्वोक्त–उपनियमान्तर्गतैः नियमैः सह तत्रत्यानि प्रावधानानि च आवश्यक परिवर्तनानि कृत्वा महाविद्यालय–परिसंस्था–पाठशालानां कृते विद्यार्थिनां च कृते विहिताः स्युः।

75 1) विद्वत्परिषदा पुरस्कृता उपाधि–पदविकोपाधि–प्रमाणपत्राणिविद्याविषयक–विशेषोपाधिश्चैत्यादीनां प्रचालनं प्रदानञ्च व्यवस्थापनपरिषद् कर्तुं शक्नोति।

पुष्टीपुरः–सरपुरस्कारः

2) यस्मिन् नैतिकाधःपातोऽन्तर्भूतः वर्तते तादृशापराधार्थं न्यायालयेन 'दोषी' इति प्रमाणीकृते व्यक्तौ, व्यवस्थापनपरिषदः विद्वतपरिषदश्च इत्येताभ्यां पुष्टपुरस्कारानुसारं तस्य व्यक्तेः यां कामपि उपाधिं सर्वथा अथवा कुलपतिमतानुसारं विशिष्टकालावधिपर्यन्तं निरस्तुं शक्नोति। अयं उपर्युक्तनाम् उपस्थितसदस्यानां द्वितृतीयांशेन, पूर्णसदस्यसंख्यायाः अर्धाधिकंसंख्यसदस्यैः च स्वीकार्यः। सदस्यानां पुष्टिपुरःसरपुरस्कारानुसारं कुलपतिः तस्योपाधिः पूर्णतः निराकर्तुमथवा विशिष्टकालपर्यन्तं वा निराकर्तुं शक्नोति।

सम्बद्धः व्यक्ति स्वपक्षस्थापनार्थ अवसरं प्राप्नुयात्। तेन विना अनेन नियमेन एतादृशः दण्डः भवितुं नार्हति।

76) अर्हता–परीक्षां विना व्यक्तेः समाजगतस्थानं नैपुण्यं सार्वजनिकसेवां च दृष्ट्वा सन्मान्योपाधिना विद्याविषयकविशेषोपाधेः पात्रत्वात् योग्यत्वात् वा तादृगुपाधिना व्यक्तिं सम्मानयितुं व्यवस्थापन–परिषद् विचारयेत्। अस्य विषयस्य पुरस्कारः व्यवस्थापनपरिषदः उपस्थितसदस्यानां द्वितृतीयांशेन, पूर्णसदस्यानां अर्धाधिक्येन च सम्मतः पुष्टः च भवितुम् अर्हति।

परं कुलगुरुणा कुलपतेः पूर्वमान्यताप्राप्त्यनन्तरमेव व्यवस्थापन–परिषद् तत्सम्बद्धं प्रस्तावं विचारार्थं न स्वीकुर्यात्।

77) विशिष्टदीक्षान्तसमारोहेन सह विद्यापीठस्य दीक्षान्तसमारोहः विहितपद्धत्या न्यूनातिन्यूनम् प्रतिशैक्षणिकवर्षम् एकवारं सम्पत्स्येत ।

पञ्जीकृत–स्नातकः

78) 1) उपनियम 2 इत्यस्य प्रावधानानाम् अधीनत्वे विद्यापीठस्य स्नातकाः विद्यापीठस्य पञ्जीकृतस्नातकानां पञ्जीयनपुस्तिकायां स्वस्य नामलेखनस्य अधिकारी भवेयुः ।

2) यः

अ) विकलमनस्कः अधिकृत–न्यायालयेन तथा घोषितः च वर्तते ।

आ) अमुक्तः ऋणक ।

इ) नैतिकाधःपातापराधार्थं (जिल्हा) नगरन्यायालयाने दोषी इति घोषितः स्यात् ।

ई) महाराष्ट्रराज्ये विधिद्वारा स्थापितस्य अन्यस्य कस्यचिद् विद्यापीठस्य पञ्जीकृत स्नातकः स्यात्

सः व्यक्तिः स्नातकानां पुस्तिकायां स्वनामलेखनं कर्तुं नार्हति ।

3) यः कोऽपि पञ्जीकृतस्नातकः भवितुम् इच्छति सः परिनियमेषु विहिते प्रपत्रे कुलसचिवाय आवेदनं कुर्यात् शुल्कं च पूरयेत् ।

4) कुलगुरुः परिपृच्छानन्तरं तन्मतेन कश्चन व्यक्तिः 'पञ्जीकृतस्नातकस्य अधिकारी भवितुमर्हति वा न वा इति निर्णयं करिष्यति । अस्मिन् सन्दर्भे कुलगुरोः निर्णयः अन्तिमः स्यात् ।

79) व्यवस्थापनपरिषदः मतेन नैतिकाधःपातापराधार्थं न्यायालयेन अपराधीति उद्घोषितस्य नाम पञ्जीकृतस्नातकसूचितः निष्कासितं कुर्यात् ।

**दशमं प्रकरणं समाप्तम् ।**

## एकादशं प्रकरणम्

## विद्यापीठ—निधिः, लेखा, लेखापरीक्षा च

वार्षिक—अर्थ—सङ्कल्पः

80. 1) आगामि—वर्षार्थं वार्षिकम् अर्थसंकल्पं प्रस्तोतुं विद्यापीठं वित्तीय—वर्षस्य आरम्भात् न्यूनातिन्यूनं मासद्वयपूर्वं वित्त—लेखा—समितेः निदेशानुसारं वित्तलेखाअधिकारिभिः सिद्धं कुर्यात् ।

2) तदनन्तरं वित्तलेखाधिकारी व्यवस्थापनपरिषदा स्वीकृतामर्थसङ्कल्पस्य प्रतीं राज्यशासनं प्रति प्रेषयेत् ।

3) राज्यशासनस्य यद् वित्तीयवर्षं तदेव विद्यापीठस्य वित्तीयवर्षं स्यात् ।

विद्यापीठ—निधिः

81. 1) विद्यापीठम् अधोदत्तान् निधीन् स्थापयिष्यति ।

अ) सर्वसाधारणनिधिः । आ) वेतननिधिः इ) विश्वस्तनिधिः ई) विकास—कार्यक्रम—निधिः । उ) आकस्मिकनिधिः ऊ) विद्यापीठस्य मतेन आवश्यकनिधिः ।

अधोदत्तनिधिः सर्वसाधारणनिधेः भागः स्याद् अथवा तन्मध्ये एव पूरणीयः स निधिः ।

2) अ) राज्यशासनेन, केन्द्रसर्वकारेण वा विद्यापीठानुदानायोगेन प्रदत्तं वेतनेतरांशदानम् अनुदानं वा ।

ब) अन्यैः मार्गैः प्राप्तं, विविधशुल्कैश्च प्राप्तं सर्वं धनम् ।

क) राज्यशासनस्य अनुमत्या अधिकोषात् अन्याच्च अभिकरणात् स्वीकृतं ऋणम् ।

ड) अन्येन मार्गेण अभिकरणात् वा प्राप्तं धनम् इत्येतत्सर्वं धनं सर्वसाधारणनिधेः भागः भविष्यति ।

3) राज्यशासनेन, केन्द्रसर्वकारेण विद्यापीठानुदानायोगेन प्रदत्तं वेतनम्, अतिरिक्तं धनं (भत्ता) इत्येतदर्थं प्राप्तं धनं वेतननिधौ समाविष्टं भवति। वेतनेतरप्रयोजनार्थं नायं निधिरूपयुज्यते ।

4) विश्वस्तव्यवस्था, मृत्युपत्रेण दत्तं धनं दानं स्थायिदानम्, अर्थसाहाय्यं तत्सम—अनुदानं च एतैः प्राप्तं धनं समाहत्य विश्वस्तनिधिर्भविष्यति ।

5) राज्यशासनात् प्राप्तं मूलभूत–सुविधा–विकास–अनुदानं, विद्यापीठ–अनुदान–आयोगात् विकाससंशोधनार्थं प्राप्तानि सर्वाणि अंशदानानि, निधिं पूरयन्ति केन्द्र–सर्वकारस्य अन्यानि अभिकरणानि, संयुक्तराष्ट्राणि, तत्संलग्नाः संस्थाः, अन्यानि अन्ताराष्ट्रियाणि अभिकरणानि, उद्योगाः, वित्तकोषाः, वित्तसंस्थाः कश्चित् व्यक्तिश्च इत्येतेभ्यः प्राप्तानि अनुदानानि विद्यापीठस्य विकास तथा कार्यक्रमनिधौ समाविष्टानि भविष्यन्ति ।

आ) अन्येषु निधिषु अस्य समायोजनं न भविष्यति न च अन्यस्मिन् प्रयोजने अस्य व्ययः भविष्यति ।

क) कार्यक्रमस्य उद्दिष्टैः सह सुसङ्गतरीत्या विकास–कार्यक्रमनिधेः उपयोगः भविष्यति । तदर्थम् एका उचिता संहिता स्वीकुर्यात् यत्र व्यवस्थापनपरिषदा प्रदीयमानाः मान्यताः तस्याः व्यय–लेखापरीक्षासम्बन्धिन्याः वित्तव्यवस्थायाः अभिकरणस्य मार्गदर्शकतत्त्वानां समावेशः भवेत् ।

6) विद्यापीठस्य लेखासु स्वतन्त्र–लेखाशीर्षान्तर्गतं आकस्मिकनिधेः प्रावधानं भवेत् । अस्य उपयोगः केवलं अकल्पितं–व्ययस्य पूर्त्यर्थमेव भवेत् ।

7) पूर्वोक्तप्रयोजनेषु यस्यार्थं व्ययः सत्वरं भवितुं नार्हति अथवा निश्चितदिनात् पूर्वं भवितुं नार्हति तदर्थं कल्पितं धनं काले–काले व्यवस्थापनपरिषदः निर्देशमनुसृत्य अधिकोषे स्थापयिष्यते ।

स्पष्टीकरणम् – अस्य उपबिन्दोः सन्दर्भे अधिकोष इत्यस्य अर्थः –

1) भारतीय–स्टेट–बँक–अधिनियमः 1955 नुसारं कृतलक्षणानुसारं भारतीय–स्टेट–बँक ।

2) भारतीय–स्टेट–बँक (दुय्यमाधिकोषाः) अधिनियमः 1959 नुसारं (दुय्यम आधिकोषः)

3) बँक–व्यवसाय–संस्था (उपक्रमाणां सम्पादनं हस्तांतरणञ्च) अधिनियमः, 1970, इत्यस्य तृतीयबिन्दोः अन्वयेन अथवा बँक–व्यवसाय संस्था (उपक्रमाणां सम्पादनं हस्तान्तरणञ्च) अधिनियम 1980 इत्यस्य तृतीयबिन्दोः अन्वयेन रचिता तत्समः नूतनः अधिकोषः ।

4) भारतीय–रिझर्व–बँक–अधिनियमः 1934 इत्यस्य द्वितीयबिन्दोः 'ङ' खण्डे दत्तलक्षणानुसारं 'अनुसूचित–अधिकोषः' अथवा राज्यशासनद्वारा मान्यताप्राप्त–अधिकोषः

82. 1) व्यवस्थापनपरिषदा नियुक्तैः लेखापरीक्षकैः विद्यापीठस्य लेखापरीक्षां कुर्यात्। येषां लेखापरीक्षकाणां विद्यापीठस्य कस्यापि प्राधिकरणेन सह आर्थिकव्यवहारेण च हितसम्बन्धः न स्यात्।

2) लेखापरीक्षणानन्तरं लेखाः विद्यापीठेन प्रसिद्धिं नीयन्ते, तासां प्रतिलिपिः लेखापरीक्षकानाम् इतिवृत्तेन सह कुलाधिपतये राज्यशासनाय च प्रेषितव्या। प्राप्तासु लेखापरीक्षितासु लेखासु अधिसभा उचितं प्रस्तावं विचार्य सम्मतिं दद्यात्।

3) विद्यापीठस्य वार्षिकम् इतिवृत्तं विद्यापीठं सिद्धं करिष्यति, प्रसिद्धिं च नेष्यति। व्यवस्थापनपरिषदा सम्मतम् इदम् इतिवृत्तं कुलाधिपतये राज्यशासनाय च (विद्यापीठं) समर्पयेत्।

**एकादशं प्रकरणं समाप्तम्**

## द्वादशं प्रकरणम्

## संकीर्णम्

प्राधिकरणाः अधिकारिणां हानेः दायित्वम्

84. (1) विद्यापीठस्य प्रत्येकं प्राधिकरणं मण्डलं वा अधिकारिणः च इत्येतेषां कर्तव्यमेतत् यत् विद्यापीठस्य हितसम्बन्धाः योग्यरीत्या रक्ष्यन्ते न वा इत्यस्य निर्णयः करणीयः।

(2) विद्यापीठस्य केनापि प्राधिकरणेन, मण्डलेन, अधिकारिणा वा सद्भावनया आचरितां कृतिं विहाय अधिनियम—परिनियम—आदेश—विनियम—इत्यन्तर्गतप्रावधानस्य विरोधिकृत्यात् वा प्रमादवशात् सञ्जाताकृत्यात् विद्यापीठस्य कस्यांश्चित् हानौ सञ्जातायां परिनियमविहितकार्यपद्धतिमनुसृत्य, तस्याः हानेः परिपूर्ति तत्तद्प्राधिकरणमण्डलसदस्यै वा संयुक्तरीत्या, पृथक्त्वेन वा कारयितुं (विद्यापीठः) अधिकारभाम्भविष्यति।

राज्य विधान—मण्डलस्य संसदः वा सदस्यत्वम्

85. (1) विद्यापीठस्य, महाविद्यालयस्य, पाठशालायाः वा अध्यापकः राज्यविधानसभायाः विधानपरिषदः संसदः वा सदस्यरूपेण निर्वाचितः नामनिर्दिष्टः वा इति कारणात् अनर्हत्वं न भजेत्।

(2) राज्यविधानमण्डस्य संसदः वा सदस्यरूपेण निर्वाचितस्य नामनिर्दिष्टस्य वा अध्यापकस्य सदस्यत्वकालावधिः विनावेतनं विनासौविध्यं च अवकाशः इति गण्येत।

(3) उप—बिन्दुः (2) मध्ये निर्देशितः अध्यापकः तस्य राज्यविधानमण्डलस्य संसदः वा सदस्यत्वस्य कालावधौ निवृत्तिवेतनं, ज्येष्ठता, वेतनवृद्धिश्च इत्यर्थम् अधिकारपात्रः भवेत्।

अर्थव्यक्ति—सम्बन्धे प्रश्नाः विद्यापीठस्य प्राधिकरणानि मण्डलानि इत्यादीनां रचनासम्बद्धः विवादः

86. अधिनियमोऽयम् अथवा कोऽपि परिनियमः आदेशः विनियमः नियमश्च इत्येतेषां प्रावधानस्य अर्थव्यक्तिसम्बन्धे, विद्यापीठस्य प्राधिकरणस्य मण्डलस्य वा सदस्य यथोचितं निर्वाचितः वा निर्दिष्टः वा नियुक्तः वा स्वीकृतः वा विद्यापीठस्य कस्यापि प्राधिकरणस्य मण्डलस्य वा सदस्यत्वस्य सः अधिकारी भवेत् वा न वा इत्यस्मिन्विषये कस्यामपि उपस्थितायां शङ्कायां, प्रतिकूलपरिणामभाजा व्यक्तिना, मण्डलेन वा समर्पिते आवेदनपत्रे वा स्वाधिकारे वा कुलगुरुः विषयोऽयं कुलाधिपतिं विचारार्थं प्रेषयेत्, कुलाधिपतिश्च आवश्यकतानुसारं मार्गदर्शनं पृष्ट्वा स्वयं निर्णयेत्। तस्य निर्णयः अन्तिमः स्यात्।

अस्य अधिनियमस्य कृतीनाम् आदेशानां च संरक्षणम्

87. विद्यापीठेन, तस्य अधिकारिणा, प्राधिकरणेन, मण्डलेन वा, सद्भावनया कृताः निर्णयाः प्रसारिताः आदेशाः वा अधिनियमस्य प्रावधानाधीनतया अन्तिमाः स्युः तदनुसारं सद्भावनापूर्वकं अधिनियमः परिनियमः आदेशः विनियमः वा नियमः वा इत्येतदन्तर्गतानि प्रावधानानि अनुसृत्य कृतानि कर्माणि अन्यानि च कार्याणि इत्येतेषां विषये विद्यापीठस्य अधिकारिणः प्राधिकरणस्य मण्डलस्य वा विरुद्धम् अभियोगः न्यायालयीना कार्यवाही वा केनापि न्यायप्रविष्टां कर्तुं न शक्यते न वा क्षतिपूर्तेः याचना।

अधिकाराणां प्रत्यायोजनम्

88. अधिनियमस्यास्य परिनियमानां प्रावधानाधीनत्वे विद्यापीठस्य कोऽपि अधिकारी किमपि प्राधिकरणं वा आदेशान्वयेन, परिनियम—आदेश—नियम—विनियमनिर्माणाधिकारं विहाय आत्मनः अन्यान् अधिकारान् स्वस्य अवराधिकारिभ्यः समर्पयितुं शक्नोति। अधिकारस्य कार्यान्वयनस्य उत्तरदायित्वं येन अधिकाराः प्रदत्ताः तस्यैव भवेत् इति समयः भवेत्।

कृतीषु कार्यवहने रचनादोषाः रिक्तपदानि कार्यपद्धत्यां नियमबाह्यता इत्येतैः कारणैः विधि—अग्राह्यता

89. व्यवस्थापनपरिषदः विद्वत्परिषदः विद्यापीठस्य अन्यस्य कस्यचिद् प्राधिकरणस्य, कस्यचिद् मण्डलस्य कुलगुरोः वा नियुक्त्यर्थं कुलाधिपतिना नियुक्तया समित्या सह अन्यस्याः समित्याः कृतिः अधोदत्तेभ्यः कारणेभ्यः विधि—अग्राह्या मन्तुं न शक्यते।

अ) ईदृशस्य कस्यचिदपि प्राधिकरणस्य, मण्डलस्य, समितेः वा सदस्येषु कोऽपि सदस्यः निर्वाचितः, न नियुक्तः नामनिर्दिष्टः स्वीकृतः वा न स्यात् अन्यैः कारणै रचनाकाले पदस्वीकृत्यै उपस्थितः सभासु वा न उपस्थितः नैकैः सम्बन्धैः वा सदस्यः, रचनायां कोऽपि दोषः वा एकं वा नैकानि पदानि रिक्तानि भवन्ति वा तदा —

आ) ईदृशस्य कस्यचिद् प्राधिकरणस्य, मण्डलस्य समितेः वा कार्यपद्धतौ न काऽपि नियमबाह्यता वर्तते, यया विचाराधीनविषयस्य योग्यायोग्यते बाधेते, सति इदृशीनां कृतीनां विधिग्राह्यता न कस्मिन्नपि न्यायालये, प्राधिकरणे वा न वा अधिकारिणां पुरतः अस्मात् कारणात् न आक्षेपः शक्यः।

**द्वादशं प्रकरणं समाप्तम्**

## त्रयोदशं प्रकरणम्

## संस्कृतविद्यापीठस्य आस्थापना

प्रथम नियुक्तयः

90. अधिनियमस्यास्य प्रावधानेषु यद्यपि अन्यत् किमपि अन्तर्भूतं स्यात् तथापि प्रथमः कुलगुरुः, प्रथमः समकुलगुरुः, प्रथमः वित्त–लेखा–अधिकारी, अन्ये च अधिकारिणः इत्येतेषां नियुक्तिः राज्यशासनं करिष्यति। तेषां सेवानां समयनिकषाः च राज्यशासनमेव विधास्यति। पञ्चवर्षाणि यावत् अथवा अधिनियमम् अनुसृत्य यावत् यावत् नियुक्तिः यद् प्रथमं भवति तावत्पर्यन्तम् एते पदं धारयिष्यन्ति।

प्रथम–प्राधिकरणानां स्थापनम्

91. अधिनियमस्यास्य प्रावधानेषु यद्यपि अन्यत् किमपि अन्तर्भूतं स्यात् तथापि प्रथमा व्यवस्थापनपरिषद्, प्रथमा विद्वत्परिषद् प्रथमं नियोजन–विकासमंण्डलं च इत्येतेषां स्थापनां राज्यशासनं करिष्यति। एषां प्राधिकरणानां यः कोऽपि सदस्यः, पञ्चवर्षाणि यावत् अथवा अधिनियममनुसृत्य यावत् नियुक्तिः भवेत्, यद् प्रथमं भवति तावत्पर्यन्तम्, पदं धारयिष्यति।

व्यत्ययानां अपाकरणम्

92. अस्य अधिनियमस्य प्रावधानानां प्रयोगे उद्भूतायां समस्यायां, परिस्थितौ, आवश्यकतामनुसृत्य, तथापि अधिनियमस्य प्रारम्भतः वर्षद्वयात्पूर्वं तां समस्यां दूरीकर्तुं यद् यद् आवश्यकं तत्तद् अधिनियमस्य उद्दिष्टानां प्रयोजनानाम् अविरोधेन सर्वं राज्यशासनस्य आदेशान्वयेन कर्तुम् अर्हति।

**समाप्तम्**